॥ ओ३म् ॥
अपि पन्थामगन्महि
स्वस्तिगामनेहसम् ।
येन विश्वा: परि द्विषो वृणक्ति
विन्दते वसु ॥ (ऋग्वेद 6।51।16 )
अप्रियं यस्य कुर्वीत भूयस्तस्य
प्रियं चरेत्।
अचिरेण प्रिय: स स्याद्योऽप्रिय:
प्रियमाचरेत्॥
( महाभारत )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23
Posting Date.: 4-5, 19-20 of Every Month

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवाद:

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालय: ए-२/३२, वजीराबाद मार्ग:, भजनपुरा, देहली-११००५३, दूरभाष: ९३११०८६७५१
ई-मेल: sanskritsamvad@gmail.com वेवसाइट: www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
ध्यानपूते ज्ञानजले रागद्वेषमलापहे।
य: स्नाति मानसे तीर्थे स
याति परमां गतिम्॥
(स्कन्द महापुराण, काशी खण्ड - 6/41)
पराञ्चि खानि व्यतृणत्स्वयंभू-
स्तस्मात्पराङ्पश्यति नान्तरात्मन्।
कश्चिद्धीर: प्रत्यगात्मानमैक्ष-
दावृत्तचक्षुरमृतत्वमिच्छन् ॥१-१-२
(कठोपनिषद्)

卐 वर्षम्-१२ 卐 अंक:-२४ (२८८) नवदेहली 卐 १६ जूनमास: २०२३त: ३० जूनमास: २०२३ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

## वेदेषुलिखितपर्यावरणप्रदूषणरक्षणोपाया: अधिकप्रभाविन: - प्रो श्रीनिवासवरखेडी



देहली (अजयकुमारमिश्रा:)। विश्व पर्यावरण दिवसे कुलपति: प्रो श्रीनिवास वरखेडी प्रोक्तवान् यत्पर्यावरण सुरक्षया विना स्वस्थ जीवन कल्पना न कर्तु शक्या। वेदेष्वपि यत्पर्यावरण प्रदूषणात् रक्षणविषये उक्तं तत् अत्यन्तं प्रभाविनी वर्तते।

वैदिक ऋषय: पर्यावरण,आयुर्वेद , ज्योतिष इत्येषां जीवनरूपत्रिवेणीसंगमस्य विषये संसाराय सर्वप्रथमं संदेश: प्रदत्तवन्त: । नैका: परंपरा: विद्यन्ते यत्र वृक्षा: क्रोडीक्रियन्ते येन तेषां संरक्षणं संवर्वनं च पारिवारिकजन: इव स्यात् । अधिकं बलं दातव्यम् । प्रो वरखेडी वैश्विकदिवस महत्त्वं स्पष्टीकुर्वन् उक्तवान् यत् एतच्छिक्षणीयं यत् समग्रपृथ्वी वसुन्धरा अस्मन्माता इव । अत: यथा माता स्वसंततिं रक्षति । अद्य पर्यावरण दिवसम् उपलक्ष्य केंद्रीयसंस्कृतविश्वविद्यालयस्य अन्यै: परिसरै: सह अस्य देहलीमुख्यालये अपि कार्यक्रम: आयोजित: । शुभारंभे श्री मनोज मिश्रस्य सस्वरं सरस्वती वन्दनया जात:। आचार्य: मधुकेश्वर भट्ट: , निदेशक: (प्रकाशनं, कार्यक्रमश्च) प्रो रा.गा.मुरलीकृष्ण: , निदेशक: ,योजना क्रमश: अतिथीनां स्वागतम् अकरोत् । प्रास्ताविकरुपेण पर्यावर संरक्षणेन संबद्धप्रतिज्ञापाठस्य वाचनम् अकरोत् । कुलसचिव: प्रो रणजित कुमार वर्मन् कथितवान् यत् पर्यावरण असंतुलनस्य आशंका अत्यन्तम् अधिका वर्धिता। प्रो मुरलीकृष्ण: पर्यावरण संतुलनाय वृक्षरोपणाय दत्तपद्म पुरस्कारस्य अपि चर्चामकरोत्। डा गणेश ति. पण्डित:,सहायक निदेशक:, प्रकाशन एवं कार्यक्रम: मंच संचालनं कुर्वन् अस्य दिवसस्य महत्त्वं प्रकाशितवान्।

तेनोक्तं यत् पर्यावरण संतुलने स्वच्छतायां च अस्यद्विश्वविद्यालयस्य समेषाम् अधिकारिणां कर्मचारिणां च महनीयं योगदानम् । अत: ते समेपि धन्यवादार्हा: ।अजय कुमार मिश्रा, प्रभारी जन संपर्क अधिकारी समेभ्य: धन्यवाद ज्ञापनं कृत्वा नवशिक्षा नीतिम् 2020 संस्कृत साहित्येन संनिहित पर्यावरण संरक्षणेन सम्बद्धं आयुर्वेद, ज्योतिष,कृषि विज्ञान, उद्यान विज्ञान इत्येषां वृत्तं समुल्लिखितं विद्यते।

## वैदिक-गणित- कार्यशालाया: आयोजनम्

डा. नरेन्द्रनाथठक्कुर:

सहर्ष संसूच्यते यत् देवघर फाउण्डेशन संस्थाया: पण्डा धर्मरक्षिणी सभाया: अङ्गीभूतस्य वेद- विद्यालयस्य संयुक्ततत्वावधाने झारखण्डराज्यस्य सांस्कृतिकराजधान्यां द्वादशज्योतिर्लिङ्गेषु



अन्यतमे वैद्यनाथधाम्नि, देवगृहे स्थानीये शिवगङ्गायास्तटे श्रीगणेशकलामन्दिरे 08.06.2023 दिनाङ्कत: 11.06.2023 पर्यन्तं वैदिक-गणित-कार्यशालाया: आयोजनं महता प्रयत्नेन सम्पादितम्। ऋग्वेदीयपूर्वाम्नाय- अनन्तश्रीविभूषितानां जगद्गुरुशङ्कराचार्यपदवाच्यानां श्रीमन्निश्चलानन्दस्वामिपादानां

शेषभाग:पंचमपुटे

## प्रत्नकीर्ति-प्राच्य-शोध-संस्थानेन प्रकाशिता आह्निकपद्धति:मिथिलायां लोकार्पिता

-डॉ. पुष्कर आनन्द:

"वेदानुगत आचार आचारपरिनिष्ठिता च दिनचर्या मिथिलाया मैथिलानाञ्च विद्वद्धौरेयाणां परम्परायात्ता काचित् सम्पदिति युगेभ्य एतदीया दिनचर्या तत्तद्युगीनैराचार्यै: व्यस्थाप्यमाना वर्त्तते। आह्निकं जीवनकृत्यं व्यस्थापयद्भि: प्रायेणैव धर्मशास्त्रिभि: स्वस्वसमये सामयिकसंशोधनविशिष्टा ग्रन्था: प्रणीता:। पुण्यश्लोवैह: वाचस्पतिमिश्रै: व्यवस्थापितम् आह्निकं बहुधा मध्ययुगे संशोधन-परिवर्धनादिभि: समलर्ङ्कृतम् ऊनविंशे शताब्दे पुनरपि युगीनाभ्यां विद्वद्भ्यां



पण्डित-परमेश्वरझा-मुकुन्दझाबख्शीभ्यां परिवर्द्धितम्। अनयोरपि परमेश्वरझानिर्मिता आह्निकपरापद्धति: देशकालपरिस्थित्यनुसारं शास्त्रानुशासने संशोधितं परिवर्द्धितमिति निजप्रणयनसमकालं मैथिलेषु मिथिलासु च प्रसिद्धिमवाप।" इमे हृदयोद्गारा दरभङ्गास्थ संस्कृतविश्वविद्यालयस्य कुलपतिभि: डॉ०-शशिनाथझामहोदयै: म०म०-पण्डितपरमेश्वरझाविरचिताया आह्निकपद्धते: लोकार्पणसमारोहे प्रस्तुता:।

मधुवनीस्थ-चिकना-ग्रामवास्तव्येन पारम्परिकसंस्कृतविदुषा डॉ०-हृषीकेशझा-महोदयेन सम्पादिता काशीस्थ प्रत्नकीर्ति-प्राच्य-शोध-संस्थानेन 'दुर्लभग्रन्थप्रकाशनमाला'-या: पञ्चमसंख्यात्वेन प्रकाशिता सेयम् आह्निकपद्धति: १३/०६/२०२३ दिने का०सि०द०सं०विश्वविद्यालयस्य 'दरबार-हॉल' नामके सभागारे विविधविद्याविषयनिष्णातानाम्

शेषभाग:पंचमपुटे

## श्री१००८ बच्चास्वामिने संस्कृतसंवादसंस्कृतसमाचारपत्रं समर्पितम्

बदायूं। देववाणी संस्कृतस्य संरक्षणे संवर्धने च सततं प्रयत्नशील: आचार्य: डॉ. राधेश्यामअवस्थी रसेंदु: अद्य मेमासीये एकविंशे दिनाङ्के श्रीमद्भावगतप्रवक्ता अनूपाचार्येण सह ऋषिभूमे: फरूखाबादस्य प्रसिद्धे पाञ्चालतटे विशाले आश्रमे निवसत: ब्रह्मर्षिनैष्ठिकब्रह्मचारिण: श्री1008 परममहात्मन: शिवस्वरूपबच्चास्वामिन: आश्रमं प्राप्य तेन सह शिष्टाचारमेलने देववाण्या: संस्कृतस्य उत्थानाय स्वीयं संस्कृतसंवादपाक्षिकसमाचारपत्रं प्रदत्तम् । यत्पठित्वा स्वामिचरण: परमाह्लादित: सन् उक्तवान् यत् संस्कृतं दृढं चेदेव राष्ट्रं सुदृढम् । स्वविचारेण तेन प्रतिपादितं यत् यद्दिने संस्कृतं जनभाषा भविष्यति तद्दिने भारतीयं भाषायिमानचित्रं परिवर्तिष्यते । महात्मनाम् अस्माकं समाज: सदैव संस्कृतसंवर्धनाय कटिबद्ध:।



# विश्वपर्यावरणदिवसस्योपलक्ष्ये पाणिनिसंस्कृतविश्वविद्यालये स्वच्छताभियानकार्यक्रमः आयोजितः'

(वार्तासंयोजकः डॉ. दिनेश चौबे)

उज्जयिनीस्थेमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य राष्ट्रियसेवायोजना (एनएसएस) इत्यस्य तत्तावधाने विश्वपर्यावरणदिवसस्यावसरे ५तमे दिनाङ्के सोमवासरे एनएसएस इत्यस्य स्वयंसेवकैः विश्वविद्यालयपरिसरे स्वच्छताभियानं कार्यक्रमस्य आयोजनं कृतम्। अवसरेऽस्मिन्




विश्वविद्यालयं प्लास्टिकमुक्तम् एवञ्च हरितपरिसरं कर्तुं सङ्कल्पः कृतः । विश्वविद्यालयस्य माननीयकुलपतिःआचार्यः विजयकुमारः सीजीवर्यः स्वसंदेशे उक्तवान् यत् पर्यावरणम् उद्दिश्य कार्यक्रमाः आयोजनीयाः अनेन समाजे परिवर्तनानि जायन्ते यतोहि वयं पर्यावरणाच्छादिते वातावरणे निवसामः अतः अस्माकं कर्तव्यम् अस्ति यत् वयं पर्यावरणस्य संरक्षणार्थं सङ्कल्पिताःभवेम।अस्मिन् दिने वयं सर्वे स्वपर्यावरणं स्वच्छं स्थापयितुं च प्रतिज्ञां कुर्मः।

विश्वविद्यालयस्य कुलसचिवेन डॉ दिलीपसोनीमहोदयेनोक्तं वयं जानीमः एव यत् वृक्षाःअस्माकं जीवने कियत् महत्त्वपूर्णाःसन्ति वृक्षाणां संरक्षणेन एव पर्यावरणस्य संरक्षणं भवति ।एनएसएससेवा प्रकल्पस्य प्रमुखः डॉ.उपेन्द्र भार्गवमहोदयस्य नेतृत्वे कार्यक्रमोयम् अभूत्। अस्मिन् सेवाकार्यसमये विश्वविद्यालयस्य प्राध्यापकाः छात्रा- शोधच्छात्राः उपस्थिताःआसन्।

# जयपुरे सञ्जयशिक्षकप्रशिक्षणमहाविद्यालये विश्वपर्यावरणदिवसस्य आयोजनम्

डॉ० अल्पनाशर्मा

जयपुरम्-विश्वपर्यावरणदिवसम् उपलक्ष्य सञ्जयशिक्षकप्रशिक्षणमहाविद्यालयस्य जयपुरस्य शिक्षाशास्त्रविभागे 'राष्ट्राय वृक्षारोपणम्' इति विषये ०५.०६.२०२३ तमे दिनाङ्के भाषणप्रतियोगिता आयोजिता, यस्यां महाविद्यालयस्य छात्राः उत्साहेन भागं गृहीतवन्तः। कार्यक्रमस्य शुभारम्भः दीपप्रज्ज्वालनेन वाग्देव्याः चित्रपटे मालार्पणेन च जातः। ततः वैदिकमङ्गलाचरणं सरस्वतीवन्दना





च महाविद्यालयस्य छात्रैः प्रस्तुतम्। कार्यक्रमेऽस्मिन् मुख्यातिथिः प्राचार्या श्रीमती डॉ० सुनीताभार्गवः उपस्थिता अभवत्। कार्यक्रमे महाविद्यालयस्य प्राध्यापकः डॉ. महेशपारिकः, डॉ.रीटा झाझरिया च निर्णायकरूपेण स्फूर्तिस्पर्धां कृत्वा (क्विज् ) निर्मितवन्तः तस्यां सहस्त्राधिक छात्राः प्रतिभागिनः आसन। कार्यक्रमस्य संयोजिका डॉ०अल्पना कार्यक्रमस्य संचालनम् अकरोत। अस्मिन्नवसरे डॉ. सुनीताभार्गव महोदया वृक्षाणां जीवनाधारितम् आध्यात्मिकं महत्वम् इति विषये स्वविचारं प्रकटय्य भारतस्य अध्यात्मेन सह प्राचीनः सम्बन्धः अस्ति इति च अवदत्। वृक्षारोपणं कृत्वा देशस्य भविष्यस्य स्वरूपनिर्माणे कथं सहकार्यं कर्तुं शक्नुवन्ति इति विषये मार्गदर्शनं कृतवान्। कार्यक्रमे महाविद्यालयस्य सामाजिकाः छात्राः उपस्थिताः आसन्। कार्यक्रमस्यास्य संचालनं तथा धन्यवादज्ञापनं डॉ० अल्पनामहोदयया कृतम्। शान्तिमन्त्रेण कार्यक्रमस्य समारोपः संजातः।

# संस्कृतभाषाशिक्षणे सर्वतोऽग्रे उत्तरप्रदेशसंस्कृतसंस्थानम्

आचार्यदीनदयालशुक्लः

लखनऊ - भारतीयत्वस्य मूलमिदं संस्कृतम् अस्ति। वृत्ति- प्राप्त्यौ चरित्रनिर्माणार्थमस्माकं ध्यानमकेन्द्रितमस्ति । दुष्परिणामोऽस्य वर्तमानेऽनुभवं कर्तुं शक्नुमः। संस्कृतभाषाविषयिक्यः बहव्यः विशेषताः अप्युक्तास्सन्ति। सरलसंस्कृतसंभाषणद्वारा संस्कृतव्याकरणे प्रवेशः, संस्कृतव्याकरणद्वारा संस्कृतग्रन्थेषु , संस्कृतग्रन्थान् पठित्वा भारतीयसंस्कृतिं ज्ञानविज्ञानपरम्परां विज्ञाय अभ्यासव्यवहारयोः




आनीय अस्माभिः निर्वहणीयम् । एतदर्थं जागरुकतया संस्कृतसम्भाषणं करणीयम् । मानवहिताय काचित् भाषास्ति चेत् तत् संस्कृतम् , एतत्विचारान् स्वजीवने अङ्गीकृतस्य उत्तरप्रदेशसंस्कृतसंस्थानस्य निदेशकः डॉ. विनयश्रीवास्तवमहोदयस्य सानिध्ये ऑनलाइनसंस्कृतसम्भाषणशिक्षणस्य कक्षाः सञ्चाल्यन्ते। उत्तरप्रदेशसंस्कृतसंस्थानस्य प्रथम/द्वितीयस्तरस्य कक्षासु बालकाः न केवलं धाराप्रवाहः संस्कृतसम्भाषणं कुर्वन्ति अपितु ते सर्वेऽपि आचरणं व्यवहारञ्चापि कुर्वन्ति । आसु कक्ष्यासु ते नियमितं समुपस्थिताः भवन्ति। संस्कृतसमुपासकाः तथा वाग्देव्याराधनेकृतसङ्कल्पवता संस्कृतं पठित्वा ज्ञात्वा च स्वस्य व्यवहारे आनयन्ति। येन तेषु संस्कारः व्यवहारः कृतज्ञता, समयपालनं च आगच्छति । एतर्थं जनाः उत्तरप्रदेशसंस्कृतसंस्थानं संस्कारदायकं संस्थानम् अपि वदन्ति । अस्य प्रत्यक्षप्रमाणं वयं संस्कृतभाषाशिक्षणस्य ऑनलाइनकक्ष्यासु दृष्टुं शक्नुमः । प्रत्येकस्मिन् मासे एकं सत्रं प्रचलति । इदं सत्रम् अस्य जूनमासस्य पञ्चमदिनाङ्कतः जूनमासस्य सप्तविंशतिदिनाङ्कपर्यन्तं भविष्यति। प्रतिदिनं सायंकाले अष्टवादने प्रशिक्षकेण दीनदयालशुक्लेन सञ्चालित ऑनलाइनकक्षायां (Online Google Meet द्वारा) प्रवेशं कुर्वन्ति । अनन्तरं सरस्वतीवन्दना ध्येयमन्त्रः च भवति । ते मिलित्वा एव स्वस्य अभ्यासं कुर्वन्ति । शान्तिमन्त्रात् परं प्रश्नसत्रं भवति। अस्मिन् सत्रे आहत्य पञ्चाशताधिकाः छात्राः उपस्थिताः भवन्ति। संस्थानस्य निदेशकः आइएएस पवन कुमारः, प्रशासनिकः अधिकारी दिनेश मिश्रः, सर्वेक्षिका डॉ चन्द्रकला शाक्या, श्रीमान् सुधिष्ठमिश्रः, धीरजमैठाणी, दिव्यरञ्जनवर्यः, राधाशर्मा इत्यादीनां मार्गदर्शनं कक्ष्यासु भवति । अद्यतनकक्ष्यायां निधिः, ज्योतिरादित्यः,सोनूप्रजापत, सुनीता मीणा, अवकेशः, अमृतेश्वरी, सुभद्रा गन्त्री आदयः पठन्ति। ये निःशुल्क-कक्षामागन्तुकामाः ते "sanskritsambhashan.com" इति लिंक् उद्घाट्य तत्र स्वानुकूलतया मासं समयं च चीत्वा स्वस्य नामांकनं कारयितुं शक्नुवन्ति। परीक्षायाम् उत्तीर्णवद्भ्यः शिक्षार्थिभ्यः प्रमाणपत्राणि अपि दूरवाणीसन्देशमाध्यम प्रेषणव्यवस्था अस्ति। ये द्वितीयस्तराय स्वस्य निःशुल्कं नामांकनं कर्तुमिच्छन्ति तेभ्यः नामांकानलिंक् "https://sanskritsambhashan.com/secondlevelreg.php" इत्यस्ति।

# संजयशिक्षकप्रशिक्षणमहाविद्यालयजयपुरे जी-२० स्मार्ट- इण्डिया- क्रियाकलापः

सर्वेषु प्रमुखेषु अन्तर्राष्ट्रीयविषयेषु वैश्विकवास्तुकलायां शासनं च आकारयति, सुदृढं च करोति। सम्प्रति भारतसर्वकारः देशे सर्वत्र विविधक्रियाकलापैः जी-२० शिखरसम्मेलनं आचरति, यस्य अन्तर्गतं एनसीटीई (राष्ट्रीयशिक्षकशिक्षापरिषद्) २०२३ तमस्य वर्षस्य जूनमासस्य २ दिनाङ्कात् १५ जूनपर्यन्तं निम्नलिखितविषयेषु केन्द्रीकृत्य सर्वाणि टीईआइ-समित्याः आयोजनं कृतवती अस्ति। कार्याणां संचालनार्थं निर्देशः दत्तः मूलसाक्षरता तथा संख्याशास्त्र (FLN) B-NIPUN डिजिटल उपक्रम D.G-20 ई. नेप 2020 उपर्युक्तविषयेषु केन्द्रीकृत्य 'शिक्षण-अध्ययनयोः शिक्षण-अध्ययन-सामग्रीणां उपयोगः' इति विषये ५ जून २०२३ दिनाङ्के संजय शिक्षक-प्रशिक्षण-महाविद्यालये एकदिवसीय-कार्यशालायाः आयोजनं कृतम् । कार्यशालायाः उद्घाटनं महाविद्यालयस्य प्राचार्या डॉ० सुनीताभार्गवः दीप प्रज्वलितः। कार्यशालायां प्रशिक्षुभिःशिक्षण-अध्ययन-प्रक्रियाम् प्रभावी, रोचकं च कर्तुं शिक्षणसाधनानाम् महत्त्वं, उपयोगं च अवगतम्। कार्यशालायाः अनन्तरं टीएलएम-प्रदर्शनस्य अपि आयोजनं कृतम्। G-20 क्रियाकलापानाम् आगामिश्रृङ्खलायां FLN (Foundational Literacy and Numeracy) इत्यस्य विषये Slogan Writing क्रियाकलापस्य आयोजनं महाविद्यालये 10/06/2023 दिनाङ्के अभवत्। स्वकलायाः सृजनशीलतायाश्च परिचयं दत्त्वा प्रशिक्षुभिः तकनीकीज्ञानस्य उपयोगेन FLN विषये प्रभावी सन्देशसहितं नारा लिखितम्। नारस्य प्रस्तुतिः अतीव आकर्षकः रोचकः च आसीत् । महाविद्यालये जी-२० १३/०६/२०२३ दिनाङ्के रङ्गोली निर्माणप्रतियोगिता आयोजिता। प्रशिक्षकाः महता उत्साहेन प्रतियोगितायां भागं गृहीतवन्तः। रङ्गोली-निर्माण प्रतियोगितायां कुलम् १२ प्रशिक्षुणः भागं गृहीतवन्तः। अस्मिन् पञ्च समूहाः निर्मिताः । प्रत्येकस्मिन् समूहे प्रशिक्षुणः मिलित्वा कार्यं कुर्वन्ति स्म। रङ्गोली मेकिंग स्पर्धायां ख. एड. पाठ्यक्रमस्य प्रशिक्षुणां प्रिया, पूजा, सोनम च प्रथमस्थानं प्राप्तवन्तः। महाविद्यालयेन आयोजितस्य जी-२० शिखरसम्मेलनस्य अन्तिमः क्रियाकलापः राष्ट्रियवेबिनारः आसीत्। 'शिक्षायां कृत्रिमबुद्धिः' इति विषये १४/०६/२०२३ दिनाङ्के राष्ट्रीयवेबिनारस्य आयोजनं कृतम् । मूल्यानि च समाजवादः प्रायः अन्तर्धानं भवति, अस्य कृते मूल्यानां जागरूकतां वर्धयितुं आवश्यकता वर्तते।

# “संस्कृतव्याकरणं संस्कृतभाषां रक्षति”- रामचन्द्रः रेग्मी

वार्ताहरः-नूतनविष्णुः रेग्मी (प्रकृतिसाधुः)

उत्तरप्रदेशसंस्कृतसंस्थानम्-लखनऊ-द्वारा २०२३-तमवर्षस्य जूनमासस्य पंचमे दिनाङ्के विंशतिदिवसाय( प्रतिदिनं एकघण्टात्मककालाय ) प्रथमस्तरीयसंस्कृतभाषाशिक्षणस्य एवं द्वितीयस्तरस्य च शुभारम्भः (समुद्घाटनसमारोहः)बहुत्र संजातः।

एतस्मिन् एवं क्रमे देहल्यां बुराडीतः अपि उत्तरप्रदेशसंस्कृतस्थानस्य भाषाप्रशिक्षकः नूतनविष्णुः रेग्मी गूगलमीट्माध्यमेन सायं ७ वादने द्वितीयस्तरीयसंस्कृतभाषाशिक्षणस्य कक्ष्यायाः शुभारम्भमकरोत्यत्र बहवः पंजीकृतच्छात्राः विभिन्नेभ्यः स्थानेभ्यः पठितुमागताःतत्र देशतः एवं विदेशत : अपि ५० संस्कृतानुरागिणः समागतवन्तः। सर्वादौ मंगलमादाय नूतनविष्णुः रेग्मी (संस्कृतभाषाप्रशिक्षकः)संस्कृतकक्ष्यायाः नियमान् अश्रावयत् ।केचन प्रशिक्षवः स्वपरिचयं संस्कृतपठनस्य कारणं चोक्तवन्तः। समुद्घाटनसमारोहेऽस्मिन् मुख्यातिथिः देहलीतः एव राष्ट्रपतिसम्मानितः श्रीरामचंद्र रेग्मी (JRF) आसीत्। तेनोक्तं यत् भाषा भावनाभिव्यक्तेः माध्यममस्ति।

संस्कृतभशब्दानामुच्चारणेन बुद्धिः तीव्रा भवति।

आत्मा मनसा जठराग्निं प्रेरयति।ततः निःसृतो वायुः हृदयप्रदेशं भूत्वा वक्त्रं प्राप्य वर्णाञ्जनयति।



संस्कृतभाषा अपरिवर्तनीया वर्तते किञ्चान्याः भाषाः समयानुसारं परिवर्तनशीलाः भवन्ति।

संस्कृतव्याकरणं संस्कृतभाषां रक्षति।

संस्कृतभाषा सरला कठिना च उभयमपि भवितुं शक्नोति।

संस्कृतव्याकरणं उत्सर्गापवादविधिना सर्वेषां शब्दानां ज्ञानं कारयति। अन्ते नूतनविष्णुना सर्वेषां कक्षासम्बद्धायाः जिज्ञासायाः उपशमनमपि कृतम्।कक्ष्यैषा प्रतिदिनं सायम् ७ वादनतः ८ वादनपर्यन्तं वादनपर्यन्तं चलति एवंच २७ मई २०२३ पर्यन्तम् कक्षायाः अवधिः । संस्कृतसंस्थाने प्रातः ८ वादनतः रात्रौ ९ वादनपर्यन्तं बह्व्यः कक्षाः संस्थानस्य बहवः प्रशिक्षका : चालयन्तु। कार्यक्रमे संस्थानस्य कार्यकारि-अध्यक्षः जितेन्द्रकुमारः, निदेशकः विनयश्रीवास्तवः,अधिकारिणौ जगदानन्दझा एवं चन्द्रकलाशाक्या, प्रशिक्षणप्रमुखः सुधीष्टकुमारमिश्रः, प्रशिक्षणसमन्वयकाः धीरजमैठाणी,राधाशर्मा दिव्यरंजनश्चोपस्थिताः आसन्। अन्ते परीक्षा अपि भविष्यति । उत्तीर्णवद्भ्यः प्रमाणपत्राणाम् वितरणस्य व्यवस्थापि संस्थानेन कृता अस्ति। उत्तरप्रदेशसंस्कृतसंस्थानेन संचालितकक्ष्याभिः एतावता बहवः उपकृताः। विशेषतः ये विद्यालयादिषु TGT/PGTइत्यनयोः कृते सज्जतां कुर्वन्ति तेऽप्यत्र पठितुमागच्छन्ति।एतया योजनया अग्रेऽपि जनाः उपकृताः भविष्यन्ति एव। शीघ्रमेव तृतीयस्तरस्यापि शुभारम्भः भविष्यति । तस्य पाठ्यक्रमनिर्माणम् अपि जातम् अस्ति ।शीघ्रमेव तस्य आरम्भः अपि भविष्यति इति सम्भावना।

ये एतां निःशुल्क-कक्षामागन्तुकामाः ते “sanskritsambhashan.com” इति लिंक् उद्घाट्य तत्र स्वानुकूलतया मासं (जुलै,अगस्त )२०२३ समयं च चीत्वा स्वस्य नामांकनं कारयितुं शक्नुवन्ति।ये प्रथमस्तरं पठितवन्तः विशेषतः तेभ्यः अन्येभ्यश्च द्वितीयस्तरस्य प्रशिक्षणमपि संस्थानेन दीयते ।परीक्षायाम् ३३% उत्तीर्णवद्भ्यः शिक्षार्थिभ्यः ७५% उपस्थितेभ्यः प्रशिक्षुभ्यः प्रमाणपत्राणि अपि दूरवाणीसन्देशमाध्यम्न प्रेषणव्यवस्था अस्ति। उत्तरप्रदेशसंस्कृत संस्थानं शीघ्रमेव “गृहे गृहे संस्कृतम् “इति योजनायाः समारम्भं कृत्वा संस्कृतस्य प्रचारे प्रसारे च किमपि विशिष्टं योगदानं दास्यति इति सम्भावना अस्ति । अस्मिन् मासे २३ प्रथमस्तरीयाः कक्षाः, १५ द्वितीयस्तरीयाः कक्षाः आहत्य ३७ कक्षाः सन्ति।तत्र १९१६+८३६= २७५२ छात्राः सन्ति ।तासु कक्षासु ३७ प्रशिक्षकाश्च सन्ति।ये द्वितीयस्तराय स्वस्य निःशुल्कं नामांकनं कर्तुमिच्छन्ति तेभ्यः नामांकनलिंक् “https://sanskritsambhashan.com/second_level_reg.php" इत्यस्ति।कार्यक्रमे महाराष्ट्रतः श्रीधारेश्वरमहाराजस्य अपि सन्निधिः आसीत्।उद्घाटनसत्रस्य अन्ते श्रीनिवाससंस्कृतविद्यापीठम्, देहल्या शुक्लयजुर्वेदशिक्षकः श्रीरमेशः रेग्मी शान्तिमन्त्रेण सत्रस्य समापनं कृतवान्।

# संस्कृतभाषाशिशणकक्षायां महाभारतस्य शकुनिपात्रे चर्चाभवत्

वार्ताहरः शशिकान्तः

जूनमासे उत्तरप्रदेशसंस्कृतसंस्थालखनऊद्वारा २०२३ संस्कृतभाषाशिक्षणकक्षासु जीवनस्य प्रत्येकं क्षेत्रं स्पृशन्तीं देववाणीं शिक्षितुं विद्यालयेषु विरामकाले सति छात्रा अपि अतीव उत्साहिनः सन्ति । प्रारम्भे देववाणीगीतमनन्तरं पङ्कजेन संस्थानगीतिकानन्तरं जागृत्या सरस्वतीवन्दनाभवत्। पर्यावरणदिवसे पर्यावरणसम्बद्धकविताभिः संस्कृतभाषाशिक्षणकक्षायाः शुभारम्भः जातः। पत्रिकापठनार्थं, मित्रालापार्थं, बालजिज्ञासाशमनार्थं, परीक्षार्थं, सम्भाषणार्थञ्च पृथक् पृथक् उद्देश्यं सफलीकर्तुं छात्राः समागताः।

उपक्रमोऽयं बहुप्रशंसनीयोऽस्ति।

आधुनिककाले संस्कृतभाषायाः उपयोगिताः उक्त्वा शास्त्रसंरक्षणे संस्कृतस्य मुख्यभूमिका प्रस्तावितासीत्। भाषाविज्ञानानुसारं संस्कृतस्य महत्त्वमुक्तम्। जिलागाजियाबादस्य संस्थानप्रशिक्षक शशिकांत महोदयेन कक्षैषा संचाल्यते। द्वितीयस्तरस्य कक्षैषा सायं ०८:०० - ०९:०० वादनपर्यन्तं प्रचलति। शशिकान्त महोदयः छात्रान् वर्णमालाज्ञानं, संस्कृतस्य सूक्ष्मतां च पाठितवान। गतेषु दिनेषु महाभारते मातुल शकुनि इत्यस्य अभिनयं कुर्वतः अभिनेतुः मृत्युः जातासीत्। तस्योपरि च कक्षायामुपस्थितेषु आशुतोषः, सुषमा, प्रीतिः, पवन, श्रुतिः, उषा, बीना, अनुराधा, सोनी, नयना इत्यादिभिः छात्रैः महाभारतस्य शकुनिपात्रे स्वविचाराः प्रकटिताः। प्रतिभागिभ्यः धन्यवादं दत्त्वा प्रशिक्षणसंयोजकः श्री धीरज मैठाणी संस्थायाः योजनायाः विषये विस्तरेण उक्तवान् । सः अवदत् यत् प्रतिमासं २ तः ३ सहस्रं छात्राः संस्कृतभाषां शिक्षन्ते। एताः कक्षाः उत्तरप्रदेशसंस्कृतसंस्थानस्य निदेशकः विनयश्रीवास्तवः, प्रधानपदाधिकारी डॉ. दिनेशमिश्रः, सर्वेक्षिका डॉ. चन्द्रकला शाक्यः, प्रशिक्षणप्रमुखः सुधिष्ठ मिश्रः, कक्षानिरीक्षणं समन्वयक दिव्य रंजनः राधा शर्मा च कृतवन्तः। ऑनलाइन माध्यमद्वारा संचालितकक्षायामन्ते पर्यावरणदिनावसरे हिन्दीसंस्कतयोः कवितागानमभवत्। अत्र ५० छात्रैः सह, संस्थायाः पदाधिकारिणः, देवांशः, सन्दीपः, अञ्जलि इत्यादयः उपस्थिताः आसन्। एतासु कक्षासु अन्ते परीक्षा अपि भविष्यति । उत्तीर्णवद्भ्यः प्रमाणपत्राणाम् वितरणस्य व्यवस्थापि अस्ति। एतावता बहवः उपकृताः। विशेषतः ये विद्यालयादिषु TGT/PGT इत्यनयोः कृते सज्जतां कुर्वन्ति, तेऽप्यत्र पठितुमागच्छन्ति । एतया योजनया अग्रेऽपि उपकृताः भविष्यन्ति एव । शीघ्रमेव तृतीयस्तरस्यापि शुभारम्भः भविष्यति । पाठ्यक्रमनिर्माणं जातमस्ति। शीघ्रमेव तस्य आरम्भः अपि भविष्यति। ये एतां निःशुल्क- कक्षामागन्तुकामाः ते जनाः “sanskritsambhashan.com" इति लिंक उद्घाट्य तत्र स्वानुकूलतया मासं समयं च चित्वा स्वस्य नामांकनं कारयितुं शक्नुवन्ति । ये प्रथमस्तरं पठितवन्तः विशेषतः तेभ्यः अन्येभ्यश्च द्वितीयस्तरस्य प्रशिक्षणमपि संस्थानेन दीयते। परीक्षायाम् ३३% उत्तीर्णवद्भ्यः शिक्षार्थिभ्यः ७५% उपस्थितेभ्यः प्रशिक्षुभ्यः प्रमाणपत्राणि अपि दूरवाणीसन्देशमाध्यमेन प्रेषणव्यवस्था अस्ति। उत्तरप्रदेशसंस्कृत संस्थान शीघ्रमेव ष्गृहे गृहे संस्कृतम् ष्इति योजनायाः कक्ष्याः समारम्भं कृत्वा संस्कृतस्य प्रचारे प्रसारे च किमपि विशिष्टं योगदानं दास्यति इति सम्भावनास्ति । शीघ्रमेव तृतीयस्तरोऽपि आरप्स्यते । निःशुल्क नामांकन कर्तुमिच्छन्ति तेभ्यः नामांकनलिंक "https:// sanskritsambhashan.com / seco nd_level_reg.php" इत्यस्ति ।

# विश्वपर्यावरणसप्ताहः

केन्द्रियसंस्कृतविश्वविद्यालय द्वारा विश्वपर्यावरणसप्ताहः समापनसमारोह सुसम्पन्नः। मङ्गलाचरणं नवनियुक्तेन श्रीमता मनोजमिश्रवर्येण कृतम् । स्वागतभाषणं प्रकाशनकार्यक्रमविभागस्य निदेशकैः डा। मधुकेश्वरभट्टवर्यैः कृतम् । प्रास्ताविकभाषणं प्रतिज्ञाविधिबोधनं च केन्द्रीययोजनानुभागस्य निदेशकैः प्रो। रा.गा. मुरलीकृष्णवर्यैः सम्पादितम्। पर्यावरणहितैषिणस्य स्यूतस्य पादपस्य च वितरणं साङ्केतिकरूपेण मुक्तस्वाध्यायपीठस्य निदेशकैः डा। रत्नमोहनझावर्यैः कृतम् ।



कुलसचिवैः आचार्यैः रणजित कुमार बर्मनवर्यैः अध्यक्षभाषणं कृतम् । जनसम्पर्काधिकारिणः डा। अजयकुमारमिश्रमहोदयाः धन्यवादान् प्राकटयन्। पर्यावरणसप्ताहस्य संयोजका: डा। गणेश ति. पण्डितवर्याः मञ्चसञ्चालनम् अकुर्वन्। प्रकाशनकार्यक्रमविभागस्य डा. बिपिन कुमार झा वर्याः , श्री जितेन्द्रमहोदयाः, श्रीमती गङ्गा शर्मा वर्या इत्यादयः चायपानव्यवस्थाम् अकल्पयन्। शान्तिमन्त्रेण सह कार्यक्रमः सुसम्पन्नः।

# श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षणाधिगम-केन्द्रेण ‘तकनीकी-शिक्षणशास्त्रीय शोधकुशलतासंवर्द्धनञ्च’ इति विषये ऑनलाइन-राष्ट्रिय सङ्कायविकासकार्यक्रमः

डॉ.आरतीशर्मा:

नवदेहली। भारतसर्वकारस्य शिक्षामन्त्रालयस्य बहुआयामिपरियोजना- पण्डितमदनमोहनमालवीयराष्ट्रियशिक्षकशिक्षणमिशनमित्यस्य अन्तर्गतत्वेन स्थापितेन नवदेहलीस्थ श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षणाधिगमकेन्द्रेण ‘तकनीकी-शिक्षणशास्त्रीय



शोधकुशलतासंवर्द्धनञ्च’ इति विषये द्विसाप्ताहिक-ऑनलाइन-राष्ट्रिय सङ्कायविकासकार्यक्रमस्यायोजनं 2023 तमवर्षस्य मई मासस्य 29 तः जून मासस्य 08 दिनाङ्कपर्यन्तं कृतम्। कार्यक्रमस्यायोजनं ‘गूगलमीट’ इति मञ्चे कृतम्। कार्यक्रमेऽस्मिन् 123 प्रतिभागिभिः भागं ग्रहीतम्। 123 प्रतिभागिषु 91 प्रतिभागिनः एकादश राज्येभ्यः, 32 प्रतिभागिनः देहली केन्द्रशासितप्रदेशतः प्रतिभागं कृतवन्तः। सम्पूर्णकार्यक्रमः 41 सत्रेषु सम्पन्नम्। तकनीकीसत्राणां सञ्चालनं शोधक्षेत्रे निष्णातानां देशस्य प्रतिष्ठानां द्वादशविशेषज्ञानां कुशलमार्गदर्शने कृतम्, तेषां नामानि यथा- प्रो. के. श्रीनिवासः, डॉ. अजयकुशवाहा, प्रो. अमितापाण्डेयभारद्वाजः, डॉ. विमलजेराल्डः, प्रो. एस. के. पुलिस्त, डॉ. आशीषकुमारअवधिया, प्रो. एस.बी. किशोरः, प्रो. वन्दनापुनिया, डॉ. दीपकबिश्ला, प्रो. रमेशचन्द्रशर्मः, डॉ. परगटसिंहगर्चा, डॉ. यशपॉलशर्मादयाः। कार्यक्रमस्योद्घाटनसत्रे शिक्षणाधिगमकेन्द्रस्य निदेशिका प्रो.अमितापाण्डेयभारद्वाज महोदयया स्वागतभाषणं कार्यक्रमस्य सन्दर्भाश्च प्रस्तुताः। कार्यक्रमस्य समापनसत्रे मुख्यातिथिरूपेण प्रो. संतोषपण्डामहोदयः (निदेशकः, स्ट्राइड, इग्नू, नई दिल्ली) एवं अध्यक्षरूपेण प्रो. मुरलीमनोहरपाठक महोदयः (कुलपतिः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली) समुपस्थिताः। प्रो. अमितापाण्डेयभारद्वाज महोदयया समापनसत्रे कार्यक्रमस्य प्रतिवेदनं प्रस्तुतम्। यस्मिन् 64 प्रतिशतः प्रतिभागिनः कार्यक्रममुम् उत्कृष्ट स्थाने निश्चितवन्तः। कार्यक्रमस्य संचालनं डॉ. तमन्ना कौशल एवं डॉ. आरती शर्मणा कृतम्। कार्यक्रमस्य सुगम व्यवस्थापनं श्री सुरेन्द्र नागर-सचिनकुमार-अक्षतडबराल-ज्ञानचन्द-राकेश-रमणजीझा महोदयानां सहयोगेन जातम्।

# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

शास्त्रेषु अंधकारम् अपसार्य प्रकाशं प्रति यः नयति सः गुरुः कथ्यते। गुरुः स एव यः अज्ञानं निराकृत्य धर्ममार्गं प्रशस्तीकरोति स भारते बहवः संप्रदायाः तु केवलं गुरुवाण्याः आधारेण विद्यमानाः सन्ति। गुरुः यान् नियमान् बोधितवान्। तेषां नियमानां श्रद्धया पालनं शिष्यस्य परमकर्तव्यम्। गुरोः कार्यं यत् नैतिकी, आध्यात्मिकी, सामाजिकी, राजनैतिका चेत्यासां समस्यानां निवारणम् अपि अस्ति स गुरोः भूमिका भारते केवलम् अध्यात्मधार्मिकतापर्यन्तं सीमिता नास्ति अपितु देशस्य राजनीतिकविपदि आगतायां सत्यां गुरुः राष्ट्राय उचितपरामर्शं दत्वा उद्धृतवान् अपि। अर्थात् अनादिकालतः गुरुः शिष्यस्य प्रत्येकं क्षेत्रे व्यापकतया समग्रतया मार्गदर्शनं कृतवान्।

अतः सद्गुरोः एतादृशमहिम्नः कारणेन तस्य व्यक्तित्वं मातुः पितुः ईश्वराच्च उपरि वर्तते।

**गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।**
**गुरुः साक्षात् परं ब्रह्म तस्मै श्री गुरवे नमः॥**

स्वीयमहत्तायाः कारणेन गुरवे ईश्वरादपि उच्चपदं दत्तम् आसीत्। शास्त्रवाक्ये गुरुः एव ईश्वरस्य विभिन्नरूपेषु ब्रह्मा, विष्णुः, महेश्वरः इत्येतेषु स्वीकृतः वर्तते। गुरुतत्वस्य प्रशंसा सर्वाणि शास्त्राणि अकुर्वन्। ईश्वरस्य अस्तित्वे मतभेदः भवितुमर्हति किंतु गुरवे कश्चन मतभेदः अद्यावधिपर्यन्तं न भवितुमर्हति। गुरुः सर्वैः मन्यते। प्रत्येकं गुरुः अपराय गुरवे आदरः प्रशंसा, पूजा चेत्यादिभिः सहितं पूर्णं सम्मानं दत्तवान् अस्ति। गुरौ देवे च समानतायै कथितं च **'यस्य देवे परा भक्तिर्यथा देवे तथा गुरुः'** अर्थात् यथा भक्ति देवेषु अस्ति तथैव गुरावपि। सद्गुरुकृपया ईश्वरस्य साक्षात्कारः अपि संभवः स सतगुरुमहिमा अपरंपारः वर्तते स संसारस्य समस्तेभ्यः गुरुभ्यः प्रणमाञ्जलिः।

## ॥ वेद वाणी ॥

श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमा भर।
वसो पुरुस्पृहं रयिम्॥
मा नो अरातिरीशत देवस्य मर्त्यस्य च।
पर्षि तस्या उत द्विषः॥
विश्वा उत त्वया वयं धारा उदन्या इव।
अति गाहेमहि द्विषः॥

O! Mighty Agni Deva ( ( Lord of Fire)"You rule all and look after their welfare. You are the greatest and most resplendent of all of divinities, grant us various kinds of desired wealth in abundance."“May no enemy whether of gods or men ever rule us.May you also protect us from such enemies. "May we, through Your favour, overwhelm, overcome and cross, like a flooded water gushing forth, all those enemies that hate us.'

The Rig Veda 2.7.1/2/3

'न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा।
पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम्॥
या वो माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे विचृत्ताः।
अश्वीव ताँ अति येषं रथेनारिष्टा उरावा शर्मन्स्याम॥

'Man is very ignorant and weak.He can't know what things lie to his right or left, in front or back. He also does not know what the right path is or the wrong one. He, should therefore, walk in the path shown by Gods and the wise and find the eternal light of wisdom."O! Revered Adityas! The bonds and illusion created by You ensnare the enemies that harm us. Sitting in a chariot, we cross all these obstructions, just as a seasoned horseman overcomes all difficult obstacles. Protected thus, we become unharmed and live in our large and happy homes.'

The Rig Veda 2.27.11/16

## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः:- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142, Indian Overseas Bank, Yamuna Vihar, Delhi-110053, IFC Code- IOBA0002249**

# समास भेदविमर्शः

-प्रोफेसर श्रीकृष्ण शर्मा
व्याकरणपीठाध्यक्षचरः
ज. रा. राजस्थान संस्कृत विश्वविद्यालयः,
जयपुरम् (राजस्थानम्)
दूरभाषः 8386943655

**समासलक्षणम्**

'समास' इति महती सञ्ज्ञाऽन्वर्थताज्ञापनाय भवति। अन्वर्थता च समसनं-समासः, संक्षेप इति यावत्। संक्षेपश्च अनेकवस्तुविषयः। 'समम् आस' इति वा 'समास' शब्दस्य व्युत्पत्तिः। 'सम' शब्दस्य 'आस' शब्देन सह समासे जाते निष्पन्नः 'समास' शब्दो योगरूढो भवति, प्रकृतिप्रत्यययोः समम् आसेऽपि तत्र समासत्वाभावात्। न चार्थबोधाय अननुसन्धीयमानविभक्तिकपूर्वपदकनाम- समुदायत्वं समासलक्षणम् इति वाच्यम्, 'दधि मधुरम्' इत्यादौ अव्याप्तेश्च। तिङन्तद्वयघटितलक्ष्ये एवमेव श्पचतभृज्जता' समुदायेऽतिव्याप्तेः। 'प्राक्-कडारात्-समासः'[1] इति पाणिनिसूत्राधिकारविहितसंज्ञावत्त्वं, समासाधिकारपठितसूत्रानुशिष्टत्वं वेत्यपि न 'कडाराः कर्मधारये'[2] समासलक्षणम्, 'प्राक्कडारात् समासः' (पा. 2.1.3) इति संकेतस्य संज्ञाया वा इत्येतत्-प्रागवधिकतया 'काकताली यम्' इत्यादि घटके 'काकतालम्' इत्यादौ "समासाच्च तद्विषयाद्"[3] इत्यनेन उपयुक्तावधिबहिर्भूत सूत्रसिद्ध नैपातनिकसमासस्थले तथा 'अन्येभ्योऽपि दृश्यते'[4] इति सूत्रे पठितेन 'क्विब्-वचि-प्रच्छ्यायतस्तु-कटप्रु-जु-श्रीणां दीर्घोऽसम्प्रसारणञ्च' इति वार्तिकेन जात- नैपातनिक-समासस्थले कटप्रूः, आयतस्तूः - इत्यादौ चाऽव्याप्तेः।

अतः समासत्ववत्त्वम्, सङ्केतविशेषसम्बन्धेन समासपदवत्वं वा समासलक्षणमिति विज्ञेयम् समासत्वञ्च समासपदशक्यतावच्छेदकतया सिद्धं जातिविशेषरूपम्, कारणतावच्छेदकतया इव शक्यतावच्छेदकतयापि जाति सिद्धेः स्वीकृतत्वात्, 'नहि कारणतावच्छेदकतयैव जातिसिद्धिर्न शक्यतावच्छेदकतयेति राजाज्ञास्ती शति भट्टनागेशोक्तेः'[5]। समासपदसंकेतश्च न 'प्राक्-कडारात् समासः' इत्येवंविधोऽपितु घटादिपदसंकेत इव अशेषसमासात्मक- लक्ष्यसंग्राहको विलक्षण एव।

समास-भेदाः-

'सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा।
सुबन्तेनेति विज्ञेयं समासः षड्विधो बुधैः॥'[6]

इति भट्टोजिदीक्षित कारिकया समासस्य षड्विधत्वं ज्ञेयम्। तत्र 'राजपुरुष' इत्यादिः सुबन्तपदद्वयकसमासः प्रथमः। सुबन्तपूर्वपदक-तिङन्तोत्तरपदकश्च 'पर्यभूषत्' 'अनुव्यचलत्' इत्यादिर्द्वितीयः। सुबन्तपूर्वपदक नामोत्तरपदकश्च 'कुम्भकार' इत्यादिस्तृतीयः। सुबन्तपूर्वपदक धातूत्तरपदकश्च 'कटप्रूः' इत्यादिश्चतुर्थः। तिङन्तपूर्वपदक- तिङन्तोत्तरपदकः 'पिबतखादता' इत्यादिः पञ्चमः। तिङन्तपूर्वपदक- सुबन्तोत्तरपदको इत्यादिष्षष्ठः।

नागोजिभट्टेन तु विशेषसंज्ञारहित-विशेषसंज्ञायुत-भेदेन पूर्वं समासस्य द्वैविध्यं प्रदर्श्य विशेषसंज्ञायुतस्य पुनरव्ययीभावादिभेदेन चतुर्विधत्वं प्रतिपादयता मिलित्वा समासस्य पञ्चविधत्वमेव प्रत्यपादि[7]। नागेशेन दीक्षित-दर्शित समासस्य षड्विधत्वविषये श्सुपां तिङाश इत्यनेनैव 'तिङा सुबन्तेन' त्यस्यापि गतार्थतेत्यप्युक्तम्[8]।

केचन वैयाकरणाः अव्ययीभाव तत्पुरुष-बहुब्रीहि-द्वन्द्वभेदेन समासस्य चतुर्विधत्वमेव प्रतिपादितवन्तः। पद्येतद्यतं भूतपूर्वः, वागर्थाविवेत्यादीनां संग्रहानुपपत्त्या प्रायोवादकथनपरत्व-वर्णनेन नागेशादिभिरपाकृतम्[9]।

अथवापूर्वपदार्थप्रधानकत्व-उत्तरपदार्थप्रधानकत्व-अन्यपदार्थप्रधानकत्व-उभयपदार्थप्रधानकत्वस्वरूपधर्मचतुष्टयेनैव समासस्य चतुर्विधत्वमभिप्रेतं प्राचीनवैयाकरणानाम्। पूर्वपदार्थप्रधानकत्वादि न क्रमतोऽव्ययीभावादिलक्षणम्, अपितु समासविभाजकतावच्छेदकताधर्ममात्रं तत्। अव्ययीभावादिस्तद्विभाजनान्तर्गत अव्ययीभावादिसामान्यलक्षणन्तु तैरपि 'अव्ययीभावादि- तत्तदधिकारान्तर्गत- विध्यनुशिष्टत्वमेवाभिप्रेतम्। 'पूर्वपदार्थप्रधानोऽव्ययीभावः' इत्याद्युक्तिस्तु पूर्वपदार्थ- प्रधानकत्वादिलक्ष्याणामव्ययीभावादिषु प्राचुर्यस्य बोधनाय। यस्य यत्र प्राचुर्यं तस्य तेनैव व्यपदेशस्य लोकव्यवहारसिद्धत्वात्, श्बाहुल्येन व्यपदेशा भवन्तीश ति शिष्टकथनाच्चेति भावः।

सन्दर्भः
1. अष्टाध्यायी, 2.1.3
2. तदेव, 2.2.38
3. तदेव, 5.3.106
4. अष्टाध्यायी, 3.2.178
5. वैयाकरणसिद्धान्तलघुमञ्जूषा (चौखम्बा संस्कृत सीरोज ग्रन्थांक : 237, पृ.89)
6. वैयाकरणभूषणकारिका, 28
7. वै. सि. लघुमंजूषा, पृ. 1422
8. वैयाकरणसिद्धान्तकौमुद्यां सर्वसमासशेषप्रकरणस्य शेखरग्रन्थे
9. (क) 'समासश्चतुर्विध इति तु प्रायोवादः, अव्यीभावतत्पुरुष बहुब्रीहि- द्वन्द्वाधिकारबहिर्भूतानामपि श्सह सुपे' ति समासविधानात्श इति। - वैयाकरणासिद्धान्तकौमुद्याः सर्वसमासशेषप्रकरणे।
(ख) समासो द्विविधो, विशेषसंज्ञाविनिर्मुक्तः श्सुप्सुपेति विहितस्तद्युतश्च। अन्यश्चतुर्धा, अव्ययीभावतत्पुरुष-बहुब्रीहि-द्वन्द्वभेदादि' ति। वै. सि. लघुमंजूषा, पृ.1422.

# मुक्तिर्नैव

हिन्दीमूलम् : डॉ. योगेन्द्रनाथ शुक्लः
संस्कृतरूपान्तरम् : डॉ. अर्चना जोशी

सीमारेखायाम् अवस्थिते तस्मिन् ग्रामे सहसा गमनागमनं वृद्धिं गतम्। मुख्यालयात् सूचना सम्प्राप्ता आसीत् यत् केचन वैदेशिकाः सन्ति तत्र, ये हि स्वदेशस्य कृते गुप्तसूचनासम्प्रेषणे संलग्नाः सन्ति।

अधिकारिणा विचारार्थं नैकाः जनाः पृष्टाः किन्तु काऽपि सूचना नैव लब्धा। एकस्मिन् भिक्षुकसदृशे विक्षिप्तप्रकारके जने सन्देहः समुत्पन्नः, तेन सह प्रच्छनम् आरब्धम्।

"किं नाम तव?"

"आदिलरामः वन्दे मातरम्।"

"कुतः त्वम्? कुत्र निवासोऽस्ति तव?"

"भारतदेशीयोऽहम्.... अत्रैव निवसामि, वन्दे मातरम्।"

"सीमारेखां निकषा किमर्थं परिभ्रमण क्रियते त्वया?"

"श्रीमन्! अहं मम पत्न्या सह बालकैश्च सह वार्तालापं करोमि .....गानं श्रावयामि, अतीव रोचते में गीतिः प्रियायै, वन्दे मातरम्।"

"अस्य कारागारे प्रतिबन्धः करणीयः, वस्तुजातं चास्य अन्वेषणीयम्, किमपि तत्र सन्देहास्पदं भवेत् तस्य समीपं तर्हि तत् मत्समीपं आनेयम्। कारागारे प्रतिबन्धितः स "भारतमाता जिन्दाबाद!" (जयतु भारतमाता। वन्दे मातरम्!) इति उद्घोषं कुर्वन् आसीत् सततम्।

तत्समीपात् यदपि उपकरणजातम् अधिगृहीतं तत् अधिकारिणः सम्मुखं काष्ठफलके स्थापितं जातम्।

एकं श्वेतश्यामम् अस्पष्टं चित्रं प्राप्तं यस्मिन् दम्पतीक्रोडे बालकौ दृश्येते स्म एका जीर्णा शीर्णा दैनन्दिनी प्राप्ता यस्यां राष्ट्रभावनायुतानि गीतानि लिखितानि आसन्। एकं सकिटं रिक्तं गुलिकास्त्रम् अपि लब्धम् आसीत्।

सर्वोऽपि सम्भारः मुख्यालये अन्वेषणप्रक्रियार्थं प्रेषितोऽभूत्। अन्वेषणस्य मासद्वयादनन्तरं ज्ञातं यत् स हि स्वातन्त्र्यसंग्रामस्य सैनिकः आसीत्। यदा राष्ट्रस्य विभाजनं जातं तदा अस्मिन् एव स्थले तस्य पत्नी बालकाभ्यां सह व्यापादिता। प्रक्रिया प्रवर्तिता घटनयाऽया तस्य मानसिक सन्तुलनं नष्टमभवत्। तदाप्रभृति स अस्मिन् एव ग्रामे आसीत्। वस्तुतस्तु तस्य नाम 'रामखिलावनः' आसीत् किन्तु मुस्लिमनारीं परिणीतवान् आसीत् सः अस्मात् कारणात् तस्य मित्रैः भार्यया च स 'आदिलरामः' इति अभिधानं प्राप्तवान्।

अन्वेषणे स्पष्टायां स्थितौ स मानसिकचिकित्सालयं प्रति नीयमानः आसीत् किन्तु तेन वाहनात् कूर्दनं कृतं, पलायमानः च स सीमारेखाम् उल्लंघ्य अपरदेशस्य सीमायां प्रवेष्टुम् उद्युक्तः। तत्रस्थाः सैनिकाश्च तं पश्यन्तः आसन् स भूमौ अपतत् किन्तु अग्रतः अपरसीमातः तस्योपरि गोलिकावर्षणे विरामस्तु नैवाभवत्।

अपरेद्युः दैनिकवृत्तपत्राणि आदिलरामस्य जीवनगाथावर्णनैः तस्य पराक्रमाणां विवरणैश्च परिपूर्णानि आसन्। तेषु एकं क्लेशकरं वृत्तम् इदमपि आसीत् यत् आदिलरामस्य नाम्नः राजनैतिकं लाभं, तत्स्थाने तस्य भूतपूर्वसेवार्थं वेतनं ('पेंशन' राशिम्) च अद्यावधि अन्यः कोऽपि लभमान आसीत्।




| प्रचार संस्करण | मुद्रित मूल्य | प्रचारार्थ |
|---|---|---|
| प्रचार संस्करण | ₹60 | ₹40 |
| विशेष संस्करण | ₹100 | ₹60 |
| पॉकेट संस्करण | ₹80 | ₹50 |
| विशिष्ट पॉकेट संस्करण | ₹150 | ₹100 |
| स्थूलाक्षर | ₹150 | ₹100 |
| उपहार संस्करण | ₹1100 | ₹750 |
| सत्यार्थ प्रकाश अंग्रेजी | ₹200 | ₹130 |
| सत्यार्थ प्रकाश अंग्रेजी सजिल्द | ₹250 | ₹170 |

# कार्यकर्तृषु समर्पणभावः अपेक्षितः - श्रीकौशलकिशोरः

**हरियाणाराज्ये उत्तरक्षेत्रप्रशिक्षणप्रमुखस्यप्रवासः जातः**

संस्कृतभारती-हरियाणाप्रान्तद्वारा सोनीपतजनपदे आयोजिते शिबिरचालकप्रशिक्षणवर्गस्य नवमे दिवसे 11 जून,2023 तमे दिनांके रविवासरे उत्तरक्षेत्रप्रशिक्षणप्रमुखस्य माननीय-कौशलकिशोरवर्यस्य प्रवासः जातः। प्रातःकाले वन्दनासत्रे महोदयः प्रान्तकार्यकर्तृभिः सह सरस्वतीमातुः पुरतः दीपप्रज्वालनं



कृत्वा सत्रस्य शुभारम्भं कृतवान्।

वन्दनासत्रानन्तरं हरियाणाप्रान्त-प्रचारप्रमुखः सत्येन्द्रवर्यः मुख्यशिक्षकस्य दायित्वं निर्वहन् वर्गशिबिरे अध्यापितवान्। पश्चात्



शिक्षकरूपेण कार्यं कुर्वन् नीरजमहोदयः बिन्दुविमर्शं कारयन् अभ्यासं कारितवान्। शून्यपाठे सर्वे वर्गार्थिनः विविधपाठ्यबिन्दूनाम् अभ्यासं कृतवन्तः।

शिक्षकगणस्य गोष्ठी आयोजिता

उत्तरक्षेत्रप्रशिक्षणप्रमुखेण कौशलकिशोरवर्येण शिक्षकगणस्य गोष्ठी स्वीकृता। अस्यां गोष्ठ्यां वर्गे शिक्षणं कथं प्रभावपूर्णं भवेत् इत्यस्मिन् विषये एवं च शिक्षणसम्बन्धि-विविधेषु विषयेषु चर्चा जाता। अस्यां गोष्ठ्यां प्रान्तसहशिक्षणप्रमुखः डॉ. नवीनशर्मा, प्रान्तप्रचारप्रमुखः सत्येन्द्रः, विद्यालयकार्यप्रमुखः नीरजश्च उपस्थिताः अभवन्।

मध्याह्न-भोजनानन्तरं कौशलकिशोरवर्येण विस्तारकरूपेण कार्यं कर्तुं येषाम् अभिलाषा वर्तते तेषां शिबिरचालकप्रशिक्षणवर्गार्थिनां गोष्ठी स्वीकृता। महोदयेन ते विस्तारकरूपेण कार्यं कर्तुं प्रोत्साहिताः प्रेरिताश्च।

सायंकाले बौद्धिकसत्रे महोदयेन शिबिरशिक्षकेण ध्यातव्याः अंशाः एवं च शिबिरात् कार्यकर्तृप्राप्तिः इत्यस्मिन् विषये शिबिरार्थिनः बोधिताः। तेन शिबिरार्थिनां कृते दिव्यदृष्टिः प्रदत्ता। कौशलमहोदयेन उक्तं यत् कार्यकर्तृषु समर्पणभावः अपेक्षितो भवति। समर्पणं विना उद्देश्य प्राप्तिः न शक्यते। तेनोक्तं यत् केषु केषु विषयेषु विशेषरूपेण ध्यानं दातव्यम्? सम्भाषणशिबिरेषु पाठनस्य के- के लाभाः? कथं शिबिरचालकस्य व्यक्तित्वस्य जीवनस्य च विकासः जायते? कौशलकिशोरवर्येण कथितं यत् कथं शिबिरचालकेन विपरीतपरिस्थितौ सत्यामपि सन्तुलितो भूत्वा कार्यं करणीयं भवति।

वर्गेऽस्मिन् अखिलभारतीयसम्पर्कप्रमुखः श्रीशदेवपुजारीवर्यः,उत्तरक्षेत्रस्य संघटनमन्त्री नरेन्द्रवर्यः, उत्तरक्षेत्रप्रशिक्षणप्रमुखः कौशलकिशोरवर्यः प्रवासं कृतवन्तः। वर्गे प्रान्तमन्त्री प्रमोदशास्त्री,सहमन्त्री भूपेन्द्रः, ईशमसिंहः, सहप्रशिक्षणप्रमुखः डॉ. नवीनशर्मा, प्रचारप्रमुखः सत्येन्द्रः,साहित्यप्रमुखः पुष्पेन्द्रः, विद्यालय-कार्यप्रमुखः नीरजः, विभागसंयोजकः डॉ. संजीवः, डॉ. पवनः इत्यादयः अनेके प्रान्तकार्यकर्तारः समुपस्थिताः। अस्य वर्गस्य समापनं जूनमासस्य त्रयोदशदिनांके भौमवासरे भविता।

---

प्रथमपुटस्य शेषभागः

## वैदिक-गणित- कार्यशालायाः आयोजनम्

संस्थापितस्यघ पीठपरिषदः सदस्येन श्रीमता रामचन्द्रदेववर्येण दिनचतुष्टयं ऋग्वेदीयपूर्वाम्नाय- अनन्तश्रीविभूषितानां श्रीभारतीकृष्णतीर्थवर्याणां सम्पादितस्य षोडशसूत्रसमन्वितस्य वैदिक- गणितस्य वैदिक-गणित-कार्यशालायां व्याख्यानं प्रदत्तम्। एतस्मिन् शुभावसरे बहवः वैदिकाः बहव्यश्च विद्यार्थिन्यश्च ,देवघर फाउण्डेशन संस्थाया: आध्यक्षपदञ्चालङ्कृतवन्तः डा. नरेन्द्र नाथ ठक्कुरमहोदया: श्री विनय नारायण खवाडेमहोदया: श्री राजदेव मिश्रमहोदया: श्रीरुपेशमिश्रमहोदया: श्रीभगवानध नमिश्रमहोदया: वेद- विद्यालयस्य प्राचार्यपदचरा: डा. विद्याध रझा महोदयाश्चोपस्थिताः आसन्।



---

प्रथमपुटस्य शेषभागः

## प्रत्नकीर्ति-प्राच्य-शोध-संस्थान....

आचार्याणाम् उपस्थितौ कुलपतिभिः अथ एतद्विश्वविद्यालयस्यैव पूर्ववेदविभागाध्यक्षैः पण्डितप्रवरैः डॉ०-विद्येश्वरझा-महाभागैः लोकार्पिता।

लोकार्पण-समारोहेऽस्मिन् मिथिलायाः सुदूरप्रान्तेभ्यः समागतान् विद्याव्यसनी: अतिरिच्य स्वयं परमेश्वरझा-महोदयानां पौत्राः श्रीरमनजीबाबू 'तरौनी'-ग्रामवास्तव्या अपि समुपस्थिता इति अद्भुत एव समवाय आसीत्।

कार्यक्रमस्यादौ प्रास्ताविकं प्रस्तुवानाः प्रत्नकीर्तिसंस्थानस्य सचिवाः प्रतापमिश्रा मिथिलायाः संस्कृतपरम् अवदानम् अथ पुण्यश्लोकैः उदयनाचार्यैः 'वयमिह पदविद्यां तर्कमान्वीक्षिकीं वा, पथि विपथे वा वर्तयामः स पन्थाः' इत्यादिभिः मैथिलानां स्कन्धेषु निहितं शास्त्रचिन्तनरक्षणपरं भारं संस्मार्य पुनरपि मिथिलायाः तन्महत्त्वं तद्वैदुष्यं तच्छास्त्रावगाहित्वम् अथ संस्कृतसेवा प्रवर्ततादिति समुपस्थितान् विदुषः छात्रांश्च समुत्प्रैरयन्। मिश्रवर्यैः विद्वांसोऽथ शोधप्रविविक्षवः छात्राः समाहूता यत्ते मिथिलायां संरक्षितान् पाण्डुग्रन्थान् समुद्धरन्तु पाटालोचन-सम्पादन-प्रकाशनपरैः व्यापारैः यस्मिन्निदम्प्रभृतिकार्येभ्य एव समर्पिता प्रत्नकीर्तिः तेषां यथाशक्ति साहाय्यमाचरिष्यति।

लोकार्पणात् पाक् ग्रन्थस्य सम्पादकैः डॉ०-हृषीकेशझा-महाभागैः अस्य ग्रन्थस्य महत्त्वं दुर्लभता पुनःप्रकाशनस्य औचित्यं सम्पादन-पद्धतिः, तदर्थम् अनुपालिताः सिद्धान्ताः, ग्रन्थप्रकृतिः, तद्विषयाः अन्ये च उपयोगिनो बिन्दवः परामृष्टा व्याख्याताश्च।

लोकार्पितस्य ग्रन्थस्य (आह्निकपद्धतेः) महत्त्वं सार्वकालिकोपयोगित्वमथ ग्रन्थकृतः परमेश्वरझा-शर्म्मणां वैदुष्यमथ सर्वशास्त्रावगाहित्वं प्रतिपादयता डॉ०-विद्येश्वरझा-महाभागैः ग्रन्थेऽस्मिन् चर्चितानां व्याख्यातानाञ्च बिन्दूनामुपरि कतिपयेषां विस्तरेण चर्चा प्रत्यपादि अथ सविस्तरं कतिपये विषया यथा विश्वेदेवा विश्वदेवा पदयो रहस्यं, अवाचि अपाचि शब्दयो याथार्थ्यं, गृहस्थानां भूतबलिप्रभृतयो व्याख्याताः।

प्रत्नकीर्तिसंस्थानं तदनुसन्धान -ग्रन्थसंरक्षण-प्रकाशन-प्रभृतिकार्याणि च भूयोभूयः प्रशंसन् मुख्यो लोकार्पकः श्रीमान् कुलपतिः अवादीद्यत् यथेदं संस्थानं प्राच्यविद्यासंरक्षणं प्रकाशनप्रभृतीनि च कार्याणि सम्पादयति तथेदमस्या विद्याया अथ संस्कृतस्य भविष्यं समुज्जवलम् आशास्महे। प्रवर्धतां तददिं संस्थानम्।

कार्यक्रमस्य सञ्चालनं रायमहाविद्याल-काशीपुर-उत्तराखण्डस्य सहायकाचार्यो डॉ०-राघवकुमारझा-महोदयेन प्रत्नकीर्ति-संस्थानस्य च विशिष्टसदस्येन कृतमथ समागतानाम् अतिथीनां कार्तज्ञ्यं प्रत्यपादि रमौली-दरभङ्गास्थ-आदर्श-संस्कृत-महाविद्यालयीयेन साहित्य-सहायकाचार्येण प्रत्नकीर्तेश्च विशिष्टसदस्येन डॉ०-पुष्कर-आनन्देन। कार्यक्रमस्यायोजने रमेश्वरलतामहाविद्यालयीय-सहायाध्यापकानां डॉ०-रामसेवकझा-महोदयानां भौतिकम् अथ गढवा-मण्डलस्य संस्कृतशिक्षकाणां डॉ०-शम्भूतिवारिणां भौतिकं साहाय्यमिह स्मरणीयमासीत्।

आरम्भ इह कार्यक्रमस्य वैदिकं मङ्गलमचारि वेदविभागीयेन सहायकाचार्येण डॉ०-ध्रुवमिश्रेण, लौकिकञ्च मङ्गलाचरणं प्रास्तुवि काशेयाभ्यां बटुभ्यां मिलिन्द-उदयनमिश्राभ्याम्। काशी-मिथिलयोः अर्वाचीनसम्बन्धस्मारकेऽस्मिन् समारोहे ग्रन्थकृतः परमेश्वरझा-शर्म्मणः तरौनी-ग्रमात् समायाता अनेके ग्रामीणाः, विश्वविद्यालयस्य कुलानुशासक-परीक्षानियन्त्रक-विविधसञ्चय-विभाग-प्रमुखाः, प्रो०-श्रीपतित्रिपाटी, प्रो०-शिवलोचनझाः, डॉ०-पवनकुमारझाः, प्रो०-दयानाथझाः, प्रो०-दिलीपकुमारझाः, डॉ०-कुणालकुमारः, प्रो०-लक्ष्मीनाथझाः, डॉ०-दिनेशझाः, डॉ०-विनयमिश्रः, डॉ०-शैलेन्द्रमोहनझाः, डॉ०-शम्भूशरणतिवारी, डॉ०-दिनेश्वरयादवः अन्ये च विश्वविद्यालयीयाः

## कविरुवाच-अद्यतनस्य सुप्रभातम्

डा०लक्ष्मीनारायणपाण्डेयः

शुष्का सरिता तटस्था
नेत्रे निमील्य
किमपि बुद्बुदायमानेव मध्याह्ने विवसना,
मेघं प्रतीक्षते।

उन्मत्त इव सागरः
उत्तालतरङ्गायित आरुह्य चपलबीचीषु
नदीमन्वेष्टुं निर्गतः,,,
न जानाति
नदी चान्तर्मग्ना युगेभ्यः।

विनष्टैरण्ये,,
नवमल्लिकारसपानमत्तमधुकरो
वसन्तस्य यशोगानं
पाषाणखण्डेभ्यः श्रावयितुं दूरादायातः।

तारकैर्निषिद्धो ज्योत्स्नयालिङ्गितो
वारिदैराच्छादितश्च मया पश्यता
चटुलश्चारुचन्द्रः,,,,
,मम पुरत एव
सहसैव राटिकायां परिणतौभवत्,,,,,,
विभावरी खिन्ना निशीथे ।

पुस्तकात् पुरस्तात
मम प्रियाः शब्दाः
पृष्ठेभ्यो बहिरागताः
पुस्तकं विहाय वदनानि पठ,,
इत्युक्त्वा मन्दं गगने तिरोहिताः,
निरक्षराणि पुस्तकानि
रत्नजडितमञ्जूषायां निषीदन्ति।

दूरादागता चटका जगाद
तत्र पर्वते
विशालपाषाणस्य वक्षं विदीर्य
प्रस्फुटितो नवाङ्कुरः सस्मितः
आह्वानं करोति,
वसन्तस्य कवेश्च।

द्वारे समुद्घाटितेपि
चन्द्रकिरणा न प्रविशन्ति गेहेस्मदीये
सघने तिमिरेपि
निशापि दूरतःपश्यन्ती विहसति मां
निद्रां प्रतीक्षमाणम्
जीवनार्थं कथं म्रियन्ते जना इति विचिन्त्य
कविरपि निशीथे जागर्ति

## मनः प्रमुखकारणम्



डॉ. जोगेन्द्रकुमारः
एसोसिएट प्रोफेसर
बी. एल. जे. एस. महाविद्यालयः
तोशामः(भिवानी)

शुभाशुभानि कर्माणि युक्तानि मनसा सह।
मन एव मनुष्याणां हेतोर्जयपराजयोः।।

शक्यमिदमशक्यं वा मन एवात्र कारणम्।
कर्मफलं मनोयोगे निगूढं परमार्थतः।।

बन्धनं विषयासक्तिः मोक्षो हि तद्विपर्ययः।
मन एव मनुष्याणां कारणं बन्धमोक्षयोः।।

वशीकृत्य कृतं कार्यं लाभप्रदं न संशयः।
मन एव मनुष्याणां कारणं हानिलाभयोः।।

मनोस्थिरं हि दुःखाय सुखाय च स्थिरं मनः।
मन एव मनुष्याणां कारणं सुखदुःखयोः।।

## ॥ श्रीजगन्नाथाष्टकम्॥

कदाचित् कालिन्दी तट विपिन सङ्गीत तरलो
मुदाभीरी नारी वदन कमला स्वाद मधुपः
रमा शम्भु ब्रह्मामरपति गणेशार्चित पदो
जगन्नाथः स्वामी नयन पथ गामी भवतु मे ।।१।।
भुजे सव्ये वेणुं शिरसि शिखिपिच्छं कटितटे
दुकूलं नेत्रान्ते सहचर-कटाक्षं विदधते ।
सदा श्रीमद्ध-वृन्दावन-वसति-लीला-परिचयो
जगन्नाथः स्वामी नयन-पथ-गामी भवतु मे ।।२।।
महाम्भोधेस्तीरे कनक रुचिरे नील शिखरे
वसन् प्रासादान्तः सहज बलभद्रेण बलिना ।
सुभद्रा मध्यस्थः सकलसुर सेवावसरदो
जगन्नाथः स्वामी नयन-पथ-गामी भवतु मे ।।३।।
कृपा पारावारः सजल जलद श्रेणिरुचिरो
रमा वाणी रामः स्फुरद् अमल पङ्केरुहमुखः ।
सुरेन्द्रै ́आराध्यः श्रुतिगण शिखा गीत चरितो
जगन्नाथः स्वामी नयन पथ गामी भवतु मे ।।४।।
रथारूढो गच्छन् पथि मिलित भूदेव पटलैः
स्तुति प्रादुर्भावम् प्रतिपदमुपाकर्ण्य सदयः ।
दया सिन्धुर्बन्धुः सकल जगतां सिन्धु सुतया
जगन्नाथः स्वामी नयन पथ गामी भवतु मे ।।५।।
परंब्रह्मापीड़ः कुवलय-दलोत्फ्फुल्ल-नयनो
निवासी नीलाद्रौ निहित-चरणोऽनन्त-शिरसि ।
रसानन्दी राधा-सरस-वपुरालिङ्गन-सुखो
जगन्नाथः स्वामी नयन-पथगामी भवतु मे ।।६।।
न वै याचे राज्यं न च कनक माणिक्य विभवं
न याचेऽहं रम्यां सकल जन काम्यां वरवधूम् ।
सदा काले काले प्रमथ पतिना गीतचरितो
जगन्नाथः स्वामी नयन पथ गामी भवतु मे ।।७।।
हर त्वं संसारं द्रुततरम् असारं सुरपते
हर त्वं पापानां विततिम् अपरां यादवपते ।
अहो दीनेऽनाथे निहित चरणो निश्चितमिदं
जगन्नाथः स्वामी नयन पथ गामी भवतु मे ।।८।।
जगन्नाथाष्टकं पुन्यं यः पठेत् प्रयतः शुचिः ।
सर्वपाप विशुद्धात्मा विष्णुलोकं स गच्छति ।।९।।
इति श्रीमत् शंकराचार्यविरचितं जगन्नाथाष्टकं संपूर्णम्

## रविगीतम् ( कजलीस्वरमयम् )



-डॉ. अरविन्दकुमारतिवारी

दाहकः प्रचण्डरश्मिभिर्दिवानिशं
रविर्दहत्यहो नृजीवनम्।।

शीतवायवो न वान्ति दीप्तवह्नयो ज्वलन्ति।
योषितो न यान्ति हा निजं महानसम्।
रविर्दहत्यहो नृजीवनम्।
दाहकः-१
पीनमाशका दशन्ति दीनबालका रुदन्ति
नीडशावका रुवन्ति हन्त सन्ततम्।।
रविर्दहत्यहो नृजीवनम्।
दाहकः-। २
कौति कोकिला द्रुमेषु रौति भ्रामरः सुमेषु।
नौति को जनो न मन्दिरं नवं नवम्।।
रविर्दहत्यहो नृजीवनम्।
दाहकः-३
हाति नो कृशानुरेष पाति नो च शम्भुरेष।
याति कामिनी पितुर्गृहं निरन्तरम्।।
रविर्दहत्यहो नृजीवनम्।
दाहकः-४
स्वेदबिन्दवो लसन्ति देहमेव निर्दहन्ति।
मानवा हरिं स्तुवन्ति भक्तिपूर्वकम्।।
रविर्दहत्यहो नृजीवनम्।
दाहकः-५
ग्रीष्मताण्डवं विभाव्य दग्धकाव्यकृद् विहस्य।
विद्युतो गतिं विचिन्त्य नात्ति पायसम्।।
रविर्दहत्यहो नृजीवनम्।
दाहकः-।। ६

## हा विधातः



-महाचार्य्यः मनतोषः भट्टाचार्यः

वार्ताकाम्रपटोलशिम्बनलकं तुम्बालुनिम्बूषणं
क्रीत्वागच्छ गृहं रमादिशति मां कुर्वे तथा दुर्बलः।
किं क्रीतं भवता धनेन भवते दत्तेऽथवा भिक्षवे
जन्मान्धोऽपि धनेन नैव लभते गृह्णाति दानं न वा।।१।।
नीतञ्चौवमहो धनेन सकलं मन्दं तथा नीरसं
दृष्ट्वा चौव परीक्ष्य देवि सकलं क्रीतं मया चण्डिका।
क्षिप्त्वा दूरमसौ निजान्तु कुरुते रुद्धाञ्च कक्षे कथं
शान्तां ताञ्च करोमि हाद्य न लभे भोज्यं क्व काव्यं ततः।।२।।
किं कार्यन्त्वधुना निशम्य घटिकायन्त्रस्य नादद्वयं
हैकाकी परिचिन्तयामि किममुं हुत्वा प्रयाचे क्षमाम्।
नो माध्यन्दिनभोजनं भवति किं नक्तन्तनं नो भवेच्-
छ्व:प्रातः किमहो ततः किमधिकं नो चिन्तयित्वा यदा।।३।।
शय्यां मे परिहाय धीरमभितः कक्षं रमाया ह्यहं
गत्वा भीतमनाः करेण हननं कुर्वेऽथ वारद्वयम्।
मह्यं नोत्तरति प्रिया न च पुनश्चोद्घाटयन्ती गृह-
द्वारं किं करणीयमत्र दिशताद्यो मन्यते पण्डितः।।४।।
ये नित्यं प्रवदन्ति बिभ्यति वचो नैवाङ्गनायाः क्वचित्
ते सर्वे न वदन्तु कश्चन सखा किञ्चेङ्गितैर्वान्यथा।
दाम्पत्ये समरे पराजितजनञ्चोद्धर्तुमिमं बटुञ्-
चोक्त्वा कौशलमेकमस्मि विजयी ज्ञात्वा यतो निश्चितम्।।५।।
ज्ञात्वा नापि वदन्ति दारविजिता भीतास्स्त्रियाः पीडनाज्-
ज्ञात्वा नापि वदन्ति दारजयिनो मन्ये न ते साधवः।
नो वा तेऽकृतदारमुक्तपुरुषा दाम्पत्यवादे कथं
युक्तास्स्युर्भगवन् विधे भवतु नो पश्चाद्दशा मेदृशी।।६।।
हा कश्चित् पतिदोषविच्च युगपत् कान्तागुणज्ञोऽधमं
मां दृष्ट्वा कृपयाह दीन! भगवान् स्रष्टा कथं सक्षमः।
दम्पत्योर्दृढबन्धनस्य विलयं कर्तुं यतश्शाश्वतं
पूर्वे जन्मनि चेह जन्मनि तथाग्रे जन्मनि त्वञ्च ते।।७।।
रामेयं खलु दम्पतीति भवतस्तस्माद्यथा माधव'-
शय्यायां सततं शयीत सततं श्रीस्सेवते वा शिवः।
नग्नस्सन् रमते करोति सकलं दुर्गा कुरु त्वन्तथा
कुर्वेऽवश्यमहं विमुञ्चति कदा द्वारं प्रतीक्षे रमा।।८।।((युग्मकम्))।।

## एवं कथं सर्वदा

लब्धं नाध्यापनं वा धनततिजनकां काञ्च वृत्तिं न दानं
पौरोहित्यं न भक्तैः(कार्यं)यजनसुपटवे साम्प्रतं दीयते मे।
वार्धक्ये सञ्चितैर्हा कथमपि च धनैर्ग्रासमात्रं लभेऽहं
द्रव्याणाञ्चोद्धर्वमूल्यं भवति पुनरहो नो धनस्यागमस्स्यात्।।१।।
संसारोऽयं कथं वा सह च परिजनैः प्रत्यहं पालयामि
धातस्त्वं नैव विज्ञो भवसि खलु न चेत् साम्प्रतं मे जनानाम्।
क्लेशादीनां कथं हा भवति च युगपत् सम्भवश्चातिथीनां
स्याद्वावेशो बहूनां क्व पचति गृहिणी यामि वाहं विपण्याम्।।२।।
दत्त्वा कष्टं विभिन्नं यदि भवति सुखं ते विधातस्सुखाय
मह्यं नो यच्छ नित्यं धनमधनवते सक्षमं बाधते कः।
जाने नो तेन कस्माद्भवति च भगवन् गौरवश्शाश्वतं ते
किं हत्वा दुर्बलं हा भवति बलवते वीर्यशौर्यप्रकाशः।।३।।
दुष्टश्च श्वपचः कुभोजनरतश्चौरश्शठो नास्तिकः
पाषण्डो गुरुतल्पगश्च कृपणो मिथ्याश्रयी लुब्धकः।
धातस्ते करुणाश्रिता ह्यहमहो धर्माश्रितो निर्धनस्-
तस्माद्देव जनः कथं हि कुरुते ते वन्दनं साम्प्रतम्।।४।।
या पूर्वं भाषते नो वचनपटियसी साम्प्रतं सैव कान्ता
पूर्वं तर्कं विना या हि सपदि कुरुते यन्मयादिष्टमेव।
युक्त्या तर्केण सैव प्रतिदिनमथ हा मन्मतं न्यक्करोति(धिक्करोति)
तस्यै चाहञ्च मे सैव कथमिह पराजेरसोढो न सत्यम्।।५।।
का ते कान्तास्ति पुत्रो भवति च तव को वक्ति नैवं गृहस्थो
यस्मात् कान्ता सदण्डा भवति च तनयो दण्डहस्तोऽस्ति गेहे।
स्वामी दण्डं विनैव प्रवसति भवने दण्डितोऽहं(स्सन्) विरक्तः
कस्मादेवं विधातो भवति मयि कथं सर्वदा दुर्बले हा।।६।।
कर्ता चासम् स्वतन्त्रो ह्यकृतपरिणयः पूर्वमेवं विधातो
यावत् सार्धं तया मे भवति परिणयो देव युक्तेऽप्रधाने।
न्यायात् सा हि स्वतन्त्रा क्वचिदपि च भवेद् योजिका कर्मणो मे
हेतुर्वा सा प्रधाना ह्यहमिह भगवन् दीनदीनोऽस्वतन्त्रः।।७।।
अन्तर्धौ येन कर्त्रा भवतु खलु च मेऽदर्शनं कामयन्ती
पित्रागारं गता सा मयि निजभवने वर्तमाने विदग्धा (संस्थिते दूरदृष्ट्या)।
दृष्ट्वा मां शास्ति कार्यं यदपि विधिवशात् सा च हेतुर्भयानां
दूरं मे विद्यते तां सततमपि रमाञ्चेप्सितां कामयेऽहम्(हा दिदृक्षुः)।।८।।
हा सामान्यं धनं यद्भवति परिमितं पोषणे मे जनानां
हे धातः काङ्क्षितं नो तदपि च भगवन् दातुमिच्छुः पुनश्च।
दुःखं कष्टं विभिन्नं यदनभिलषितं तच्च दत्ते ह्यनन्तं (प्रत्यहं तच्च दत्ते)
दत्त्वा मानं प्रगृह्णे प्रविनतशिरसा धर्म एषः कुतस्ते।।९।।

# श्रीमद्भगवद्गीतोक्तज्ञानप्राप्त्युपायानां परिशीलनम्

-डॉ. सोमदत्तः
गोरक्षनाथ-राजकीयसंस्कृत- महाविद्यालयः नाहनम्,
जिला सिरमौरः, हिमाचलप्रदेशः।

ज्ञानं हि विश्वेऽस्मिन् पवित्रतमं वर्त्तते। ऋते ज्ञानान्मुक्तिः इत्यादिकम् अपि प्रसिद्धमेव। साङ्ख्याः तत्र मन्वते यत् प्रकृतेः अष्टसु रूपेषु विद्यमाने: सप्तभिः रूपैः पुरुषो बध्यते इति। ज्ञानमेव एकमात्रं वर्त्तते, येन मोक्षपर्यायं कैवल्यं प्राप्तं भवति। यच्च परमार्थः उच्यते। एतादृशस्य पवित्रतमस्य मुक्तेःसाधनस्य बन्धननाशकस्य ज्ञानस्य प्राप्तौ कस्य वै अनिच्छा स्यात् । इष्टप्राप्तौ च यत्नः आवश्यकः । यत्नः अपि सः एव यः ज्ञानप्राप्तौ प्रयोजकः स्यात् । ज्ञानम् अनन्तं वर्त्तते मानवस्य च जीवनं अल्पावधिकम् एव। अतः ज्ञानप्राप्तौ यो यत्नः सो व्यवस्थितः क्रमबद्धः च स्यात् । तेन अल्पेन आयासेन अल्पेनैव कालेन अधिकं सिद्धं भवेत्। आशुः ज्ञानप्राप्ते: मार्गः नूतनः निर्मातव्यः अथवा अन्वेष्टव्यः इति विचारावसरे पूर्वनिर्मितसिद्धमार्गस्य प्रयोग एव वरम्। अस्माकं पूर्वजाः विपुलं साहित्यं विरच्य पर्याप्तं मार्गदर्शनम् अकुर्वन्।

श्रीमद्भगवद्गीतायां मोक्षसाधनस्य अर्थप्रकाशकस्य ज्ञानस्य प्राप्तिविषये यद् वर्णितं तदाधारेण ज्ञानप्राप्तेः सरणिः काचित् प्रस्तूयते। ज्ञानप्राप्तिनिमित्तं बहुत्र वर्णितं स्यादेव। परन्तु श्रीमद्भगवद्गीतायां यथा स्पष्टमुक्तं न तथा अन्यत्र। द्रव्यमयस्य यज्ञस्य अपेक्षया ज्ञानयज्ञस्य महत्त्वोपपादनसमये ज्ञानप्राप्तौ कोऽधिकारी? के चास्य प्राप्तौ उपायाः? इति विस्तरेण चर्चितम्। ज्ञानाधिकारिणः विषये अत्रोल्लेखो वर्त्तते यत् श्रद्धावान् तत्परः संयतेन्द्रियो ज्ञानं लभते।

अत्र सर्वप्रथमं श्रद्धावतः अधिकारित्वमुक्तम्। श्रद्धावाँल्लभते ज्ञानम् इत्यस्य कः आशयः? इत्यवगन्तुम् अस्माभिः श्रद्धा इति शब्दस्य प्रप्रथमम् अर्थः अवगन्तव्यः।

श्रत्धातोः धाप्रत्यये श्रद्धा इति रूपम्। अमरकोशे च श्रद्धाशब्दस्य सम्प्रत्ययः, स्पृहा इत्येतदर्थद्वयम् उक्तम्। सम्प्रत्ययः शपथः इति चेत् श्रद्धावान् इत्यस्य शब्दस्य मतुप्प्रत्ययान्तत्वात् तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रबलेन श्रद्धावान् इति शब्दस्य व्युत्पत्तिः शपथः अस्यास्तीति भवति । ज्ञानप्राप्त्यै इयं श्रद्धा ज्ञेये ज्ञानश्रोतसि चात्यन्तम् आवश्यकी। कृष्णयजुर्वेदस्य कठशाखायाः कठोपनिषदि विद्यमानः यमनिचिकेतसोः सम्वादो विषयेऽस्मिन् दृष्टान्तरूपेण अस्ति। तत्र वर्णनं प्राप्यते यत् नचिकेतसः पित्रा वाजस्रवसा सर्वस्वदानयज्ञं कृतम्। यज्ञस्य अन्ते दक्षिणारूपेण ब्राह्मणेभ्यः पीतोदकानां जग्धतृणानां गवां दानं कृतम्। एतस्मात् कारणात् पितुः रुष्टः नचिकेता पौनःपुन्येन मां कस्मै दास्यतीति प्रश्नम् अकरोत्। प्रश्नस्य पौनःपुन्यतया क्रोधाविष्टस्य पितुः यमाय ददामि इति कथनकारणेन यमलोकगतः नचिकेता यमराजम् अप्राक्षीत् यत् तृतीयवरदानरूपेण भवान् अस्य संशयस्य समाधानरूपां विद्यां पाठय यत् मृत्योः अनन्तरम् अपि मनुष्यस्य सत्ता भवति वा नवा? इति।केचन कथयन्ति सत्ता अस्ति। केचन कथयन्ति न अस्ति।

एवं पृष्टे सति यद्यपि यमो नचिकेतसं सामान्यं कञ्चन बालं मत्वा बुद्ध्यगम्यत्वम् अस्य शास्त्रस्य प्रतिपादितवान्। मृत्योः रहस्यम् अन्यतं गूढम्, न तथा सरलं यत् भवादृशः कश्चन बालोऽपि अवगन्तु शक्नुयात् इति।

“देवैरप्यत्र विचिकित्सितम्”

यमस्य अनेन कथनेन ध्वनितं भवति यत् दिव्यगुण-युक्ताः देवाः अपि अत्र संशयापन्नाः, त्वं तु कश्चन बालः एव । बालत्वात् अनधिकारी भवान् अस्य ज्ञानस्य प्राप्तौ। अनधिकारिणे विद्या न दातव्या इत्यादिप्रसिद्धेः यमस्य अस्य विचारस्य सम्भावना। मृत्योः रहस्यस्य दुर्बोधतायां यमद्वारा देवानामपि अस्य ज्ञानस्य न सुज्ञेयत्वम् इति वाग्व्यवहार एव प्रमाणम्। एवं यमो यत्तवान् यत् नचिकेता बालहठं त्येजेत् इति। यदा यमद्वारा मृत्योः रहस्यस्य दुर्बोधत्वनिष्पादनानन्तरम् अपि बालहठं न यदा त्यजति तदा यमः स्वाभिष्टं साधयितुं बहुविधानि प्रलोभनानि अपि यच्छति । यानि प्रलोभनानि दत्तानि न तानि सामान्यानि तद्यथा

1 शतायुषः पुत्रपौत्राः, 2 पशवः, 3 हस्तिनः, 4 हिरण्यम्, 5 भूमिः, 6 इच्छामृत्युः।

एतादृशानि प्रलोभनानि पुरतः प्राप्यापि नचिकेता स्वकीयं हठं न त्यजति। यमः नचिकेतसं वदति यदि भवान् एतद् मनुते यत् मया दीयमानानि भवतः वरस्य तुल्यत्वं न भजन्ति तर्हि इतोऽपि दातुं शक्नोमि। अतः कानिचत् प्रलोभनानि ततोऽपि प्रस्तौति

ये ये कामा दुर्लभाः मर्त्यलोके,
सर्वान् कामान् छन्दतः प्रार्थयस्व।
इमा रामाः सरथा सतूर्या,
न हीदृशा लम्भनीया मनुष्यैः।
आभिर्मत्प्रत्ताभिः परिचारयस्व
नचिकेतो मरणं मानुप्राक्षीः।।

नचिकेता मृत्योः रहस्यस्य वरस्य स्थाने अन्यं कञ्चन वरं याचेत इत्येतदर्थं यमेन कृतानां प्रयत्नानां यदि समीक्षां कुर्मः तर्हि स्पष्टं भवति यत् श्रद्धाशब्दस्य य कोऽपि अर्थो भवतु, शपथो भवतु स्पृहा वा भवतु। एतद् द्वयम् अपि नचिकेतसि आसीत्। तस्माद् एव एतादृशं गूढं रहस्यम् अवगन्तुं शक्तवान् नचिकेता।

दृष्टान्तेन निष्कर्षः प्राप्तो यत् ज्ञानप्राप्तौ ज्ञेये उपदेशके च श्रद्धा आवश्यकी । अर्थात् मया अयम् एव विषयो ज्ञातव्योऽस्माद् एव उपदेशकाच्च ज्ञातव्यमित्यत्र श्रद्धा स्यात्।

श्रीमद्भगवद्गीतायाः यस्मिन् श्लोके ज्ञानप्राप्त्यै श्रद्धायाः महत्त्वम् उक्तं तस्मिन्नेव श्लोके अग्रिमे भागे तत्परः लभते इत्यप्युक्तम्। आसक्तः इति शब्दकल्पद्रुमः। आसक्तः अर्थात् आसमन्तात् सङ्गयुक्तः। अत्र तत्परत्वं नाम सङ्गत्वम्। यद् विषयकं ज्ञानं प्राप्तव्यं तेन सह सङ्गः आवश्यकः। कस्मात् सङ्गः ज्ञानाय आवश्यकः इति चेत् सङ्गः एव कामस्य जनकः अस्तीति तु श्रीमद्भगवद्गीता एव पाठयति। कामः अर्थात् काचित् इच्छा इति । तत्परत्वेन इच्छायाः उत्पत्तिः। इच्छायां सत्यामेव काचिद् अपि प्राप्तिः शक्या भवति । यदि धनस्य इच्छा भवति तर्हि धनप्राप्तिः, मोक्षस्य इच्छया मोक्षप्राप्तिः भवति। तथैव ज्ञाने इच्छायां सत्याम् एव ज्ञानप्राप्तिः।

श्रद्धावाँल्लभते ज्ञानम् इत्यादौ श्लोके ज्ञानप्राप्तेः अधिकारिणः चर्चायां लभ्यते यत् संयतेन्द्रियत्वमपि जिज्ञासोः वैशिष्ट्यं स्याद् एव। संयतेन्द्रियाणि यस्य सः संयतेन्द्रियः। यः स्वकीयानि इन्द्रियाणि संयमितुं शक्नोति सः एव ज्ञानं प्राप्तुं शक्नोति। तदेतद् एवं अवगन्तुं शक्नुमः यत् कश्चन जनः प्रातः सूर्योदयकाले सूर्यस्य वर्णः कः? इति ज्ञातुं तत्परः सन्नपि रूपगुणग्राहकस्य चक्षुरिन्द्रियस्य संयमनाभावे न अभिष्टं ज्ञानं कर्तुं क्षमो भविष्यति। भास्करो यदि पूर्वदिशि स्यात् तथाच चक्षुरिन्द्रियम् उत्तरदिशि दक्षिणदिशि वा स्यात् तर्हि रूपसम्बन्धि ज्ञानं न भवितुम् अर्हति। अत्र निरुक्तकारोऽपि अयताय इति उक्त्वा असंयतेन्द्रियाय निरुक्तस्य अध्यापनं न करणीयम् इति परामर्श अददात्।

ज्ञानावाप्तेः चर्चायाः अनन्तरं श्रीमद्भगवद्गीतायां ज्ञानस्य प्राप्त्युपायाः अपि वर्णिताः। एतद्धि अनुभूतिविषयः समेषां यत् उपायानाम् अभावे अधिकारिणि सत्यपि ज्ञानाभावः जायते एव।तद्यथा गोदुग्धरसास्वादनकर्त्तरि सति गोः दुग्धे च उपस्थिते सत्यपि गोदुग्धप्राप्त्युपायाभावे गोदुग्धे को रसः इति न ज्ञातुं शक्यते।

एवमेव ज्ञातृज्ञेययोः उपस्थितौ अपि उपायाभावे ज्ञानं न शक्यते। अतः भक्तवत्सलो भगवान् वासुदेवः श्रीकृष्णः उपायान् अपि अबोधयत् तत्रोपायेषु तत्त्वदर्शिनः ये ज्ञानिनः आप्तपुरुषाः ज्ञानवन्तः सन्ति तेभ्योऽपि तेषाम् उपदेशद्वारा ज्ञानप्राप्तिः शक्या भवति। ते कथम् उपदेक्ष्यन्ति? तत्र के उपायाः? इति चेत् प्रणिपातेन, परिप्रश्नेन सेवया च तद्विद्धि इति कथनस्य अभिप्रायः भवति यत् प्रणिपातः प्रथमः, परिप्रश्नः द्वितीयः सेवा च तृतीयः उपायः अस्ति।

प्रणिपातच्छब्दस्य अभिधेयस्तु नमस्कारः भवति। परन्तु अस्य शब्दस्य व्यङ्ग्यार्थः आदरः अत्र वर्त्तते। गुरूणाम् आदरः विधेयः इति तु अस्माभिः ज्ञातचरमेव । एतस्याः परम्परायाः पराकाष्ठा दृश्यते अस्मिन् प्रचलिते श्लोके

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुःसाक्षात् परब्रह्म तस्मै श्रीगुरवे नमः।।

परिप्रश्नः अपरः कश्चन ज्ञानप्राप्त्युपायः। परि इति उपसर्गपूर्वकः प्रश्नच्छब्दः जिज्ञासा पृच्छा अस्य पर्यायौ। परितः जिज्ञासा, परितः प्रश्नः च इत्येतौ परिप्रश्नपर्यायौ। अनुभूत्यनन्तरं प्रश्नः एव सः उपायः, येन अन्येन अनुभूतम् अथवा ज्ञातम् अपरः कश्चन ज्ञातुं शक्नोति। कठोपनिषदि अपि वयं पश्यामो यत् नचिकेता कश्चन बाल एव यमेन अनुभूतं मृत्योः रहस्यं ज्ञातुं शक्तवान्। अत्रापि नचिकेतसः प्रश्नाभावे सति मृत्युरहस्य प्राप्तिः शक्या नासीत्।

ज्ञानप्राप्त्यै सेवा कश्चन अन्यतम उपाय इति श्रीमद्भगवद्गीतायां स्पष्टमेव गीतं या खलु स्वयं पद्मनाभस्य मुखपद्माद् विनिसृता। गीतामहात्म्ये यत्र श्रीकृष्णस्य दोग्धरूपेण वर्णनं गीतायाश्च दुग्धरूपेण तत्रैव उपनिषदां दुग्धदातृगोरूपेण वर्णनम्। उपनिषदः गीताज्ञानस्य स्रोतः तत्रापि सेवापराय शिष्याय विद्या दातव्या इति स्पष्टम् ईरितम्।

विष्णुस्मृतौ अपि शुश्रूषा शब्देन ज्ञानप्राप्त्यै सेवायाः महत्त्वं कीर्त्तितम्। तत्रोक्तमस्ति यत् शुश्रूषा रहिताय शिष्याय विद्यादानं तथैव भवति यथा ऊषरभूमौ बीजवपनम्।

भारतीयदर्शनानाम् अनुसारेण मोक्षः परमार्थः देहप्राप्तेः। अस्य च मोक्षस्य प्राप्तिः ऋते ज्ञानात् न इति वेदान्तदर्शनमतम्। अधिकारी एव ज्ञानं प्राप्नुयात् अधिकारिणे एव वा ज्ञानं दातव्यं इत्यादिकं मनसि निधाय ज्ञानप्राप्त्यै अधिकारिभिः भाव्यम्। श्रीमद्भगवद्गीतायाः अनुसारेण योगसंसिद्धः, श्रद्धावान्, तत्परः, संयतेन्द्रियः च अधिकारी उक्तः।

निष्कर्षः

मृत्युतरणे साधनरूपं ज्ञानं स्याद् अमृतत्वप्राप्तौ साधनरूपं वा ज्ञानं। अत्र समेषामेव जिज्ञासा ज्ञानप्राप्त्यै किं कार्यं किं वाऽकार्यं जिज्ञासामेतां पूरयितुं नूतनानां मार्गाणाम् अन्वेषणस्य आवश्यक्ता नास्ति। यतो हि कार्यऽकार्यावस्थितौ शास्त्रं प्रमाणं भवति। ज्ञानप्राप्तिविषये श्रीमद्भगवद्गीता मुक्तकण्ठेन घोषयति तत्परः संयतेन्द्रियः श्रद्धावान् अधिकारी भवति तथाच एतादृशो योऽधिकारी सः प्रणिपातपूर्वकं सेवया परिप्रश्नेन ज्ञानं प्राप्नोति। एवं अधिकारिणि श्रद्धावत्त्वम् तत्परत्वं संयतेन्द्रियत्वं च इत्येते त्रयः गुणाः आवश्यकाः भवन्ति। अस्य प्राप्त्यै प्रणिपातः सेवा परिप्रश्नश्च उपायाः सन्ति।

परिशीलित-ग्रन्थ-सूची

श्रीमद्भगवद्गीता
प्रकाशकः गीताप्रैस गोरखपुर उत्तरप्रदेश
मुद्रणवर्षम् संवत् 2074 (सन् 2017)

सांख्यकारिका
प्रकाशकः शारदा संस्कृत संस्थान, सी27/59, जगतगंज, वाराणसी- 221002
मुद्रणवर्षम् रामनवमी, सम्वत्सर 2054 ( सन् 2003)

तैतीरीयोपनिषद् उ, ब्रह्मानन्दवल्ली
प्रकाशकः गीताप्रैस गोरखपुर
मुद्रणवर्षम् संवत् 1993 ( सन् 1936) प्रथम संस्करण

पाणिनीयधातुपाठः
प्रकाशकः रामलालकपूर ट्रस्ट, रेवली , सोनीपत,-39 ( हरियाणा) अणुसंकेतः riktrust@yahoo.in मुद्रणवर्षम् विक्रमी सम्वत 2067 ( सन् 2010)

कठोपनिषद्
प्रकाशकः साहित्य भण्डार, शिक्षा साहित्य प्रकाशक, सुभाष बाजार, मेरठ , पिन संख्या 250002 उत्तरप्रदेश
मुद्रणवर्षम् विक्रमी संवत् 2055 ( सन् 1997-98)

अमरकोषः
प्रकाशकः चौखम्बा पब्लिशर्स , गोकुल भवन, के 37/109 गोपालमन्दिर लेन वाराणसी, पिन 221001
मुद्रणवर्षम् सम्वत्सर 2065 ( सन् 2008)

शब्दकल्पद्रुमः
प्रकाशकः राष्ट्रिय संस्कृत संस्थान, मानितविश्वविद्यालय ( मानव संसाधन विकास मन्त्रालय, भारतसरकार के अधीन) 56 -57 , इन्स्टीट्यशनल एरिया, जनकपुरी, नई दिल्ली 110058
मुद्रणवर्षम् विक्रमी संवत् 2063 ( सन् 2006) तृतीय संस्करण

गीतामहात्म्यम्
प्रकाशकः गीताप्रैस गोरखपुर उत्तरप्रदेश
मुद्रणवर्षम् संवत् 2074 (सन् 2017)

# एकादशी - श्रीमद्भगवद्गीता राष्ट्रिय - व्याख्यानगोष्ठी

-चन्द्रकांतशुक्लः

तुलनात्मकधर्मदर्शनविभागः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी, राजकीय-महिलामहाविद्यालयः, परेड-ग्राउण्ड, जम्मू एवं चातुर्वेदसंस्कृतप्रचारसंस्थानम्, काशी उत्तरप्रदेशः इत्येतेषां संयुक्ततत्त्वावधाने 'विश्वसंस्कृतकुटुम्बकम्' आमुखपटलद्वारा 'एकादशी श्रीमद्भघ्गवद्गीता





राष्ट्रिय - व्याख्यानगोष्ठी' आयोजिता या 'ऑनलाइन' पाक्षिकी द्वादशी प्रस्तुतिः आसीत्। इयं गोष्ठी आषाढ़कृष्णैकादश्यां २०८० तदनुसारं १४ जून २०२३ बुधवासरे सायं ६:०० वादनतः समारभत।

एतस्य कार्यक्रमस्य शुभारम्भः श्री स्वामी नारायणानन्दतीर्थ वेदविद्यालयस्य प्राचार्येण कृतेन मङ्गलाचरणेन अभवत। तदनु डॉ. चन्द्रकान्तदत्तशुक्ल-महोदयस्य सुपुत्रेण आयुष्मता प्रथमेशदत्तशुक्लेन मधुरकण्ठेन श्रीमद्भगवद्गीतायाः केचन श्लोकाः प्रस्तुताः। एतस्याः गोष्ठ्याः संयोजकः डॉ. चन्द्रकान्तदत्तशुक्लः, सहायकाचार्यः, राजकीयस्नातकोत्तरमहाविद्यालयः, मुहम्मदाबाद, गोहना, मऊ, उ.प्र. आसीत् येन स्वागतभाषणेन कार्यक्रमे समागतानां सर्वेषां स्वागतं विहितम्।

अत्र समन्वयकः डॉ नितिन आर्यः, सहायकाचार्यः, सं.सं.वि.वि. वाराणसी आसीत्। मुख्यवक्तृत्वेन प्रो. नन्दा जयन्त पुरी, आचार्याचरा, कविकुलगुरूकालिदाससंस्कृत- विश्वविद्यालयः रामटेक, महाराष्ट्रम्, स्वीयं सम्बोधनं प्रदत्तवती। 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इति भावैः पूर्ण तस्याः व्याख्यानं कर्मसिद्धान्तेऽभवत्। पुनश्च विशिष्टवक्तुः डा. जि. नरसिंहलु, सहायकाचार्यः, दर्शनविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः, मध्यप्रदेशः, एतस्य महाभागस्य "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इति भावगर्भितं विशिष्टं सम्बोधनमजायत।

पुनश्च एतस्य कार्यक्रमस्य आध्यक्ष्यं निर्वहतां सभाध्यक्षाणां प्रो. हरिप्रसाद अधिकारिमहाभागानाम्, आचार्याः अध्यक्षाश्च, तुलनात्मकधर्मदर्शनविभागः, सं.सं.वि.वि. वाराणसी, अध्यक्षीयं रुचिकरमुद्बोधनं समजायत। अन्ते च चन्द्रकान्तदत्तशुक्ल - महोदयद्वारा कार्यक्रमे समुपस्थितानां समेषां संयोजनसमितेश्च विशेषेण धन्यवादसमर्पणेन कार्यक्रमस्य समापनमभवत। अत्र कार्यक्रमे डॉ. अरविन्द कुमार तिवारी, डा. एस. पी. सारस्वतः, डॉ. ममता शर्मा इत्यादीनां महानुभावानां गरिमामयी उपस्थितिः सञ्जाता

# रामनगरमहाविद्यालयीययोगविभागायोजकत्वेन 'योगः समग्रस्वास्थ्यं च' इत्यस्मिन् विषये गुरुदिवसव्याख्यानं समायोजितम्

वार्ताप्रेषकः- डॉ. मूलचन्द्र-शुक्लः

रामनगरम् । पी. एन. जी.राजकीय-स्नातकोत्तर- महाविद्यालय-रामनगरस्थस्य,नैनीताल-उत्तराखण्डस्य योगवैकल्पिकचिकित्साविभागीयायोजकत्वेन गुरुदिवस-व्याख्यानमालायाः द्वितीयशृंखलाक्रमे षोडश-आनलाईन- व्याख्यानमायोजितम्। व्याख्यानमालायाः शुभारम्भो मुख्यातिथिना प्रोफेसर शिशिर कुमार पाण्डेय महोदयेन कार्यक्रमनिदेशकेन प्राचार्य-प्रोफेसर एम.सी.पाण्डे महोदयेन च संयुक्तरूपेण सम्पादितः।



तत्र प्राचार्यमहोदयेन अतिथीनां स्वागतपूर्वकं गुरुदिवस-व्याख्यानमालायाः प्रस्तावना प्रस्तुता। व्याख्यानविषयः 'योगः समग्रं स्वास्थ्यञ्च' आसीत्। कार्यक्रमस्य मुख्यातिथिरूपेण जगद्गुरु-श्रीरामभद्राचार्य-दिव्यांग -विश्वविद्यालय-चित्रकूटस्थस्य ,उत्तरप्रदेशस्य माननीयकुलपतिः प्रोफेसर शिशिर-कुमार पाण्डेय महोदयः सन्तिष्ठति।मुख्यातिथिवर्येण स्वोद्बोधने प्रोक्तं यत् मानवो योगस्य अष्टाङ्गानि स्वजीवने अवधार्य जीवनं निर्मलं सुव्यवस्थितं च कर्तुं स्वयमेव प्रभवति। विदुषा प्रोफेसर-पाण्डेय-महोदयेन निगदितं यत् कुण्डलिनीजागरणेन मानसिकस्वास्थ्यं सम्यक् भवतु योगशास्त्राणि निर्दिशन्ति। माननीयकुलपतिवर्येण स्वीये वक्तव्ये तुलसीदासस्य रामचरितमानसात् ष्मोह सकल व्याधिन कै मूलाष इत्यादीनि उदाहरणान्यपि प्रस्तुतानि।कार्यक्रमस्य मुख्यवक्त्रीत्वेन बरकतउल्लाह-विश्वविद्यालयस्य, भोपालस्थस्य, मध्यप्रदेशस्य योगविभागाध्यक्षा प्रोफेसर साधना दौनेरिया चितासीत। एतया विदुष्या 'योगः समग्रं स्वास्थ्यं च' इति विषये विस्तृतं सारगर्भितं च व्याख्यानं प्रस्तुवता योगचिकित्सायाः महत्त्वम् , उद्देश्यं वर्तमानकाले प्रासङ्गिकता च इत्यादिषु विषयेषु विहितम्। महोदयया उक्तं यत् यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः एतानि पञ्च बाह्यसाधनानि धारणा, ध्यानं समाधिश्च एतानि त्रीणि आन्तरिक-साधनानि च सम्मेल्य अष्टयोगाङ्गानां क्रमशः सम्यक् नियमपरिपालनपूर्वकं प्रयोगद्वारा मनुष्यः शारीरिक-मानसिकस्वास्थ्यं सुदृढं कृत्वा मोक्षं प्राप्तुं शक्नुयात् । अत्र श्रद्धाविश्वासौ कारणीभूतौ स्तः । विदुष्या मुख्यक्त्र्या उच्यते यत् समग्रस्वास्थ्यलाभाय शारीरिकमुद्राणां श्वासप्रश्वासयोर्व्यायामानां ध्यानादीनां च संयोजनेन नियमितरूपेण योगाभ्यासो विधेयः। कार्यक्रमस्य आयोजकसचिवः असि. प्रोफेसर-संस्कृतम्, स्नातकोत्तरयोगस्य संयोजकश्च डॉ. मूलचन्द्रशुक्लो वरीवर्ति। डॉ. शुक्लमहोदयेन कार्यक्रमस्य संचालनं कुर्वता विषयसम्बन्धितं संक्षिप्तञ्च विषयवस्तु प्रस्तुतम् । कार्यक्रमस्यान्ते अनेनैव अतिथिभिः सह समेषां/सर्वासाञ्च धन्यवादो विज्ञापितः। कार्यक्रमे प्रोफे. जी. सी. पन्तः, डॉ. सुमन कुमारः, डॉ. अनुराग श्रीवास्तवः, डॉ. दीपक खाती, प्रकाशबिष्टः, डॉ. डी. एन. जोशी, डॉ. नितिन ढोमने, मुरलीधर कापडी, इत्यादिभिश्च सहयोगः कृतः। कार्यक्रमे महाविद्यालयपरिवारेण सह विविध विद्यालयेभ्यः महाविद्यालयेभ्यः विश्वविद्यालयेभ्यः संस्थाभ्यश्च विद्यार्थिनः,प्राध्यापक-प्राध्यापिकाः,योगानुरागिणो विशिष्टजनाश्च उपस्थिता आसन् । तत्र प्रोफे. जया तिवारी, प्रोफेसर निलिम्प त्रिपाठी, प्रोफेसर विनोदमिश्रः, डॉ. प्रदीपसेमवालः, डॉ. निवेदिता, डॉ. सुदीपपाण्डेयः, डॉ.सुभाषचन्द्रः, डॉ. शारदापाठकः, डॉ. वेदप्रकाशः, डॉ. अखिलेशः, डॉ. फरीन , इत्यादयः संयुता आसन्।

# विद्यामार्तण्डः स्वामिदीक्षानन्द-सरस्वतीवर्याणां 105 तमः जन्मोत्सवः

विद्यामार्तण्डः स्वामिदीक्षानन्दसरस्वतीवर्याणां १०५ तमः जन्मोत्सवः समर्पणशोधसंस्थानसाहिबाबादे अतीव भव्यतापूर्णतया सम्पन्नः जातः। आर्यसंन्यासी स्वामिप्रणवानन्दसरस्वतीवर्यायाः विशेषः आशीर्वादः अपि सर्वैः सम्प्राप्तः। यज्ञस्य कार्यक्रमस्य च संयोजकेन डॉ. धर्मेन्द्रशास्त्रिवर्येण अतीव



सुन्दरतया यज्ञः कारितः। कार्यक्रमस्य मुख्यातिथिरूपेण राष्ट्रनिर्माणपार्टी इत्यस्य अध्यक्षः श्रीमान् ठाकुरविक्रमसिंहवर्यस्य आशीर्वादः प्राप्तः । देशस्य प्रख्यातविद्वान् डॉ. विद्याप्रसादमिश्रः , डॉ. पुनीत आचार्यः , श्रीमान् आर्यतपस्वी , डॉ. रवीन्द्रप्रसादभटनागरः , आचार्यः धनञ्जयः , श्री आनन्दकुमारः (IPS) एतेषां सर्वेषां प्रेरकानि उद्बोधनानि अभवन् । डॉ. सुकृतिमाथुरः ,श्री अविरलमाथुरः एतयोः मधुरकण्ठेन भजनप्रवाहः अभवत् । संस्थानस्य पक्षतः श्री विनयआर्यः ( महामंत्री दिल्ली, आर्य प्रतिनिधि सभा )महोदयस्य प्रशस्तिपत्रं प्रदाय विशेषं सम्मानं कृतम् । श्रीमान् राकेशभटनागरवर्येण कार्यक्रमस्य कुशलसंचालनं कृतम् । एतेन सम्पूर्णकार्यक्रमस्य सर्वाव्यवस्था अतीव कुशलतया संपादिता । श्री सुरेशआर्यः , श्री वेदप्रकाशआर्यः च एताभ्यां सहयोगेन कार्यक्रमस्य उत्तमा सफलता जाता । कार्यक्रमस्य अन्ते विशिष्टातिथिः स्वामिदीक्षानन्दवर्यस्य अनन्यः भक्तः श्री नवीनरहेजावर्येण ( रहेजा बिल्डर्स ) अत्र आगत्य कार्यक्रमस्य शोभा वर्धिता , उक्तं च यत् स्वामिवर्याणां साहित्यस्य आधुनिकीकरणम् ( डिजिटलाइज ) अवश्यमेव भविष्यति इति । सम्पूर्णः कार्यक्रमः आर्यसन्देशदूरदर्शनेन (टीवीद्वारा) देशे विदेशे च जनाः प्रत्यक्षरूपेण दृष्टवन्तः। कानिचन चित्राणि दर्शयामि ।



अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।